CC-0. In Public Domain. Digitization by eGangotri

संस्कृतम्

वेदविभूषण-तृतीयवर्षः

महर्षि-सान्दीपनि-राष्ट्रिय-वेदविद्या-प्रतिष्ठानम्
(भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)
वेदविद्या मार्ग, चिन्तामण गणेश, पो. ऑ. जवासिया, उज्जैन (म.प्र.) 456006

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतम्

वेदविभूषण-तृतीय-वर्षः

डा. देवानन्दशुक्लः
डा. सदानन्दत्रिपाठी

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् उज्जयिनी
(मानव-संसाधन-विकास-मन्त्रालय, भारत सरकार)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रधानसम्पादकः
प्रो. रूप किशोर शास्त्री (सचिव)

लेखकौ
डा. देवानन्दशुक्लः (परियोजनासमन्वयकः)
डा. सदानन्दत्रिपाठी

© महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी

मूल्यम् : 40/-

संस्करणम् : 2014 प्रथम

प्रकाशिताः प्रतयः : 2000

प्रकाशकः
महर्षि-सान्दीपनि-राष्ट्रिय-वेदविद्या-प्रतिष्ठानम्
(मानवसंसाधनविकासमन्त्रालयः भारतसर्वकारस्याधीनम्)
वेदविद्या मार्ग, चिन्तामण गणेश, पो.ऑ. जवासिया, उज्जैन (म.प्र.) 456006
दूरभाष : (0734) 2502266, 2502254 तथा फैक्स : (0734) 2502253
ई-मेल - msrvvpujn@gmail.com वेबसाईट - www.msrvvp.nic.in

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्राक्कथनम्

सुविदितमेव भवद्भिः महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानमिदं वेदविद्यायाः संरक्षणार्थं प्रचारप्रसारार्थं समुन्नतये नानाविधं कार्यक्रमं क्रियमाणं दिनानुदिनं वर्धतेतराम्। सम्प्रति वेदविभूषणमित्यस्मिन् पाठ्यपुस्तकमिदं सुसम्पन्नमिति गौरवमनुभवति प्रतिष्ठानम्।

प्रतिष्ठानस्य पाठ्यक्रमः मौखिकपरम्पराधारितत्वात् मौखिकी परीक्षा आसीदिति भवन्तः जानन्त्येव । यस्मिन् पाठ्यक्रमे कालान्तरे आधुनिकविषयाः व्यावहारिकज्ञान-दृष्ट्या समाविष्टाः। तेऽपि मौखिकपरीक्षोन्मेषमात्रमेवासन्, यस्माद् वेदविभूषणोत्तीर्ण-छात्राणामुच्चाध्ययनार्थं उच्चसंस्थासु प्रवेशप्रक्रियायां काठिन्यमासीत् एवञ्च पाठ्यपुस्तकाभावे अध्ययनाध्यापने बाधाऽपि जातेति । विषयेऽस्मिन् गभीरतया चिन्तनस्य परिणामः एवेदानीम् पुस्तकाकारेण भवतां समक्षे समुपस्थितः । देशेऽस्मिन् प्रतिष्ठानद्वारा सञ्चालितसंस्थानामपि च विद्यार्थिनामध्यापकानाञ्च सौविध्यर्थम् आधुनिकविषयकानां ग्रन्थस्वरूपे पाठ्यक्रमं सज्जीकृत्य अध्ययनाध्यापनार्थं मार्गः प्रशस्तो भवत्विति प्रतिष्ठानस्य मौलिकोऽयमभिनवप्रयासः । पाठ्यक्रमेऽस्मिन् वैदिकवटूनां कृते सुगमतया अवबोधनार्थमस्य पाठ्यक्रमस्य व्यावहारिकरूपमभिलक्ष्य पुस्तकानिप्रकाशितानि । यस्मात् पाठ्यपुस्तकमिदं भवतां सम्मुखे प्रस्तूय मोमुद्यते मे मनः ।

लेखकवर्याभ्यां देवानन्दशुक्ल-सदानन्दत्रिपाठिभ्यां पुस्तकमिदं स्वस्य सम्पूर्णाध्यापनजीवनस्यानुभवं पुरस्कृत्य छात्राणाङ्कृते सरलभाषया सज्जीकृतमेतदर्थं द्वावपि लेखकौ सुतरां साधुवादार्हौ । पुस्तकमिंद वेदविभूषणस्य छात्राणामुपयोगाय लक्ष्यसाध्यं भविष्यतीति मे विश्वासः ।

प्रो. रूप किशोर शास्त्री
सचिवः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वेदभूषण-तृतीय-वर्षीयः

संस्कृत-पाठ्यक्रमः

संस्कृतभाषायाः इतिहासोऽत्यन्तः प्राचीनो वरीवर्त्ति। सुरभारतीयमेतादृशे महत्तमे भारतवर्षे परिव्याप्ता वर्तते यत्रत्या जनाः प्रारम्भकालादेव स्वस्मिन् वाग्व्यवहारे दैनन्दिने नैकासां भाषाणां प्रयोगः क्रियमाणा दरीदृश्यन्ते। भारतीयसङ्घेन तथा च संविधानेन सम्मान्यभाषासु संस्कृतमप्येकस्याः मान्यभाषायाः स्वरूपे स्वीकृता विद्यते। संस्कृतं सर्वासां भाषाणां जननी, सर्वजनोच्चशिखरप्रापिका भाषाऽस्ति। द्रविडेत्यादीनामन्यासां भाषाणामुपरि प्रभावोऽस्याः सुस्पष्टरूपेण दृग्गोचरीभवति।

संस्कृतभाषा स्वस्य व्याकरणस्य कारणादेव विश्वस्य सर्वश्रेष्ठभाषारूपेण समादृता राराजते। अतः व्याकरणाध्ययनदृष्ट्या कानिचन सर्वनामशब्दरूपाणि, धातुरूपाणि लघुसिद्धान्तकौमुद्याः पञ्चसन्धिप्रकरणम्, आचार्यभर्तृहरिप्रणीतं नीतिशतकं चारभ्यतः त्रिंशत्पद्यपर्यन्तम्' अध्ययनार्थं निर्धारितमस्ति।

आगच्छन्तु वयं सर्वे क्रमशः स्वीयमध्ययनं प्रारम्भं कुर्वाणाः शब्दरूपैः धातुरूपैश्च सह नैजं पाठाभ्यासं कुर्मः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वेदभूषण-तृतीय-वर्षीय

संस्कृत-पाठ्यक्रम

संस्कृत का इतिहास अत्यन्त प्राचीन है। यह भाषा ऐसे विशाल देश में व्याप्त है जहाँ की जनता प्रारम्भ से ही अपने बोलचाल में अनेक भाषाओं का प्रयोग करनी आ रही है। भारतीय संघ तथा संविधान द्वारा मान्य भाषाओं में संस्कृत भी एक मान्य भाषा के रूप में स्वीकृत है। संस्कृत सभी भाषाओं की जननी एवं सभी को उच्च शिखर पर पहुँचाने वाली भाषा है। द्रविड़ इत्यादि अन्य भाषाओं के ऊपर इसका प्रभाव स्पष्ट रूप से दिखाई पड़ता है।

संस्कृत भाषा को अपने व्याकरण के कारण ही विश्व की भाषाओं में सर्वश्रेष्ठ भाषा का स्थान प्राप्त है। अतः व्याकरण अध्ययन की दृष्टि से कतिपय सर्वनाम शब्दरूप धातुरूप लघुसिद्धान्तकौमुदी का सन्धिप्रकरण अध्ययनार्थ रखा गया है। साथ ही आचार्य ,भर्तृहरिप्रणीत नीतिशतक के आदि के तीस श्लोकों को प्रधानता दी गई है।

आइए हम क्रमशः अपने अध्ययन को प्रारम्भ करते हुए शब्दरूपों-धातुरूपों से अपने पाठ को आरम्भ करते हैं :

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वनामशब्दः तद् – शब्दः (पुँल्लिङ्गे)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सः	तौ	ते
द्वितीया	तम्	तौ	तान्
तृतीया	तेन	ताभ्याम्	तैः
चतुर्थी	तस्मै	ताभ्याम्	तेभ्यः
पञ्चमी	तस्मात्	ताभ्याम्	तेभ्यः
षष्ठी	तस्य	तयोः	तेषाम्
सप्तमी	तस्मिन्	तयोः	तेषु

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	_____	तौ	_____
द्वितीया	तम्	_____	तान्
तृतीया	_____	ताभ्याम्	_____
चतुर्थी	तस्मै	_____	तेभ्यः
पञ्चमी	_____	ताभ्याम्	_____
षष्ठी	तस्य	_____	तेषाम्
सप्तमी	_____	तयोः	_____

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वनामशब्दः तद् — शब्दः (स्त्रीलिङ्गे)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सा	ते	ताः
द्वितीया	ताम्	ते	ताः
तृतीया	तया	ताभ्याम्	ताभिः
चतुर्थी	तस्यै	ताभ्याम्	ताभ्यः
पञ्चमी	तस्याः	ताभ्याम्	ताभ्यः
षष्ठी	तस्याः	तयोः	तासाम्
सप्तमी	तस्याम्	तयोः	तासु

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सा	____	ताः
द्वितीया	____	ते	____
तृतीया	तया	____	ताभिः
चतुर्थी	____	ताभ्याम्	____
पञ्चमी	तस्याः	____	ताभ्यः
षष्ठी	____	तयोः	____
सप्तमी	तस्याम्	____	तासु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वनामशब्दः तद् – शब्दः (नपुंसकलिङ्गे)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	तत्	ते	तानि
द्वितीया	तत्	ते	तानि
तृतीया	तेन	ताभ्याम्	तैः
चतुर्थी	तस्मै	ताभ्याम्	तेभ्यः
पञ्चमी	तस्मात्	ताभ्याम्	तेभ्यः
षष्ठी	तस्य	तयोः	तेषाम्
सप्तमी	तस्मिन्	तयोः	तेषु

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	_____	ते	_____
द्वितीया	तत्	_____	तानि
तृतीया	_____	ताभ्याम्	_____
चतुर्थी	तस्मै	_____	तेभ्यः
पञ्चमी	_____	ताभ्याम्	_____
षष्ठी	तस्य	_____	तेषाम्
सप्तमी	_____	तयोः	_____

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वनामशब्दः यद् — शब्दः (पुँल्लिङ्गे)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	यः	यौ	ये
द्वितीया	यम्	यौ	यान्
तृतीया	येन	याभ्याम्	यैः
चतुर्थी	यस्मै	याभ्याम्	येभ्यः
पञ्चमी	यस्मात्	याभ्याम्	येभ्यः
षष्ठी	यस्य	ययोः	येषाम्
सप्तमी	यस्मिन्	ययोः	येषु

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	____	यौ	____
द्वितीया	यम्	____	यान्
तृतीया	____	याभ्याम्	____
चतुर्थी	यस्मै	____	येभ्यः
पञ्चमी	____	याभ्याम्	____
षष्ठी	यस्य	____	येषाम्
सप्तमी	____	ययोः	____

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वनामशब्दः यद् – शब्दः (स्त्रीलिङ्गे)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	या	ये	याः
द्वितीया	याम्	ये	याः
तृतीया	यया	याभ्याम्	याभिः
चतुर्थी	यस्यै.	याभ्याम्	याभ्यः
पञ्चमी	यस्याः	याभ्याम्	याभ्यः
षष्ठी	यस्याः	ययोः	यासाम्
सप्तमी	यस्याम्	ययोः	यासु

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	या	____	याः
द्वितीया	____	ये	____
तृतीया	यया	____	याभिः
चतुर्थी	____	याभ्याम्	____
पञ्चमी	यस्याः	____	याभ्यः
षष्ठी	____	ययोः	____
सप्तमी	यस्याम्	____	यासु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वनामशब्दः यद् — शब्दः (नपुंसकलिङ्गे)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	यद्	ये	यानि
द्वितीया	यद्	ये	यानि
तृतीया	येन	याभ्याम्	यैः
चतुर्थी	यस्मै	याभ्याम्	येभ्यः
पञ्चमी	यस्मात्	याभ्याम्	येभ्यः
षष्ठी	यस्य	ययोः	येषाम्
सप्तमी	यस्मिन्	ययोः	येषु

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	_____	ये	_____
द्वितीया	यद्	_____	यानि
तृतीया	_____	याभ्याम्	_____
चतुर्थी	यस्मै	_____	येभ्यः
पञ्चमी	_____	याभ्याम्	_____
षष्ठी	यस्य	_____	येषाम्
सप्तमी	_____	ययोः	_____

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वनामशब्दः इदम् — शब्दः (पुँल्लिङ्गे)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	अयम्	इमौ	इमे
द्वितीया	इमम्	इमौ	इमान्
तृतीया	अनेन	आभ्याम्	एभिः
चतुर्थी	अस्मै	आभ्याम्	एभ्यः
पञ्चमी	अस्मात्	आभ्याम्	एभ्यः
षष्ठी	अस्य	अनयोः	एषाम्
सप्तमी	अस्मिन्	अनयोः	एषु

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	अयम्	_____	इमे
द्वितीया	_____	इमौ	_____
तृतीया	अनेन	_____	एभिः
चतुर्थी	_____	आभ्याम्	_____
पञ्चमी	अस्मात्	_____	एभ्यः
षष्ठी	_____	अनयोः	_____
सप्तमी	अस्मिन्	_____	एषु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वनामशब्दः इदम् — शब्दः (स्त्रीलिङ्गे)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	इयम्	इमे	इमाः
द्वितीया	इमाम्	इमे	इमाः
तृतीया	अनया	आभ्याम्	आभिः
चतुर्थी	अस्यै	आभ्याम्	आभ्यः
पञ्चमी	अस्याः	आभ्याम्	आभ्यः
षष्ठी	अस्याः	अनयोः	आसाम्
सप्तमी	अस्याम्	अनयोः	आसु

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	____	इमे	____
द्वितीया	इमाम्	____	इमाः
तृतीया	____	आभ्याम्	____
चतुर्थी	अस्यै	____	आभ्यः
पञ्चमी	____	आभ्याम्	____
षष्ठी	अस्याः	____	आसाम्
सप्तमी	____	अनयोः	____

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वनामशब्दः इदम् – शब्दः (नपुंसकलिङ्गे)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	इदम्	इमे	इमानि
द्वितीया	इदम्	इमे	इमानि
तृतीया	अनेन	आभ्याम्	एभिः
चतुर्थी	अस्मै	आभ्याम्	एभ्यः
पञ्चमी	अस्मात्	आभ्याम्	एभ्यः
षष्ठी	अस्य	अनयोः	एषाम्
सप्तमी	अस्मिन्	अनयोः	एषु

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	इदम्	____	इमानि
द्वितीया	____	इमे	____
तृतीया	अनेन	____	एभिः
चतुर्थी	____	आभ्याम्	____
पञ्चमी	अस्मात्	____	एभ्यः
षष्ठी	____	अनयोः	____
सप्तमी	अस्मिन्	____	एषु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वनामशब्द: किम् — शब्दः (पुँल्लिङ्गे)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	कः	कौ	के
द्वितीया	कम्	कौ	कान्
तृतीया	केन	काभ्याम्	कैः
चतुर्थी	कस्मै	काभ्याम्	केभ्यः
पञ्चमी	कस्मात्	काभ्याम्	केभ्यः
षष्ठी	कस्य	कयोः	केषाम्
सप्तमी	कस्मिन्	कयोः	केषु

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	____	कौ	____
द्वितीया	कम्	____	कान्
तृतीया	____	काभ्याम्	____
चतुर्थी	कस्मै	____	केभ्यः
पञ्चमी	____	काभ्याम्	____
षष्ठी	कस्य	____	केषाम्
सप्तमी	____	कयोः	____

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वनामशब्दः किम् — शब्दः (स्त्रीलिङ्गे)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	का	के	काः
द्वितीया	काम्	के	काः
तृतीया	कया	काभ्याम्	काभिः
चतुर्थी	कस्यै	काभ्याम्	काभ्यः
पञ्चमी	कस्याः	काभ्याम्	काभ्यः
षष्ठी	कस्याः	कयोः	कासाम्
सप्तमी	कस्याम्	कयोः	कासु

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	का	____	काः
द्वितीया	____	के	____
तृतीया	कया	____	काभिः
चतुर्थी	____	काभ्याम्	____
पञ्चमी	कस्याः	____	काभ्यः
षष्ठी	____	कयोः	____
सप्तमी	कस्याम्	____	कासु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वनामशब्दः किम् — शब्दः (नपुंसकलिङ्गे)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	किम्	के	कानि
द्वितीया	किम्	के	कानि
तृतीया	केन	काभ्याम्	कैः
चतुर्थी	कस्मै	काभ्याम्	केभ्यः
पञ्चमी	कस्मात्	काभ्याम्	केभ्यः
षष्ठी	कस्य	कयोः	केषाम्
सप्तमी	कस्मिन्	कयोः	केषु

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमा	____	के	____
द्वितीया	किम्	____	कानि
तृतीया	____	काभ्याम्	____
चतुर्थी	कस्मै	____	केभ्यः
पञ्चमी	____	काभ्याम्	____
षष्ठी	कस्य	____	केषाम्
सप्तमी	____	कयोः	____

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वनामशब्दः एतद् — शब्दः (पुँल्लिङ्गे)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	एषः	एतौ	एते
द्वितीया	एतम्	एतौ	एतान्
तृतीया	एतेन	एताभ्याम्	एतैः
चतुर्थी	एतस्मै	एताभ्याम्	एतेभ्यः
पञ्चमी	एतस्मात्	एताभ्याम्	एतेभ्यः
षष्ठी	एतस्य	एतयोः	एतेषाम्
सप्तमी	एतस्मिन्	एतयोः	एतेषु

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	एषः	____	एते
द्वितीया	____	एतौ	____
तृतीया	एतेन	____	एतैः
चतुर्थी	____	एताभ्याम्	____
पञ्चमी	एतस्मात्	____	एतेभ्यः
षष्ठी	____	एतयोः	____
सप्तमी	एतस्मिन्	____	एतेषु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वनामशब्दः एतद् – शब्दः (स्त्रीलिङ्गे)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	एषा	एते	एताः
द्वितीया	एताम्	एते	एताः
तृतीया	एतया	एताभ्याम्	एताभिः
चतुर्थी	एतस्यै	एताभ्याम्	एताभ्यः
पञ्चमी	एतस्याः	एताभ्याम्	एताभ्यः
षष्ठी	एतस्याः	एतयोः	एतासाम्
सप्तमी	एतस्याम्	एतयोः	एतासु

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	____	एते	____
द्वितीया	एताम्	____	एताः
तृतीया	____	एताभ्याम्	____
चतुर्थी	एतस्यै	____	एताभ्यः
पञ्चमी	____	एताभ्याम्	____
षष्ठी	एतस्याः	____	एतासाम्
सप्तमी	____	एतयोः	____

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वनामशब्दः एतद् – शब्दः (नपुंसकलिङ्गे)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	एतत्	एते	एतानि
द्वितीया	एतत्	एते	एतानि
तृतीया	एतेन	एताभ्याम्	एतैः
चतुर्थी	एतस्मै	एताभ्याम्	एतेभ्यः
पञ्चमी	एतस्मात्	एताभ्याम्	एतेभ्यः
षष्ठी	एतस्य	एतयोः	एतेषाम्
सप्तमी	एतस्मिन्	एतयोः	एतेषु

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	एतत्	____	एतानि
द्वितीया	____	एते	____
तृतीया	एतेन	____	एतैः
चतुर्थी	____	एताभ्याम्	____
पञ्चमी	एतस्मात्	____	एतेभ्यः
षष्ठी	____	एतयोः	____
सप्तमी	एतस्मिन्	____	एतेषु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अद् भक्षणे लट्-लकारः (वर्तमान-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अत्ति	अत्तः	अदन्ति
मध्यमपुरुषः	अत्सि	अत्थः	अत्थ
उत्तमपुरुषः	अद्मि	अद्वः	अद्मः

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	____	अत्तः	____
मध्यमपुरुषः	अत्सि	____	अत्थ
उत्तमपुरुषः	____	अद्वः	____

लृट्-लकारः (भविष्यत्-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अत्स्यति	अत्स्यतः	अत्स्यन्ति
मध्यमपुरुषः	अत्स्यसि	अत्स्यथः	अत्स्यथ
उत्तमपुरुषः	अत्स्यामि	अत्स्यावः	अत्स्यामः

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	अत्स्यति	____	अत्स्यन्ति
मध्यमपुरुषः	____	अत्स्यथः	____
उत्तमपुरुषः	अत्स्यामि	____	अत्स्यामः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लोट्-लकारः (आज्ञार्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अत्तु / अत्तात्	अत्ताम्	अदन्तु
मध्यमपुरुषः	अद्धि / अत्तात्	अत्तम्	अत्त
उत्तमपुरुषः	अदानि	अदाव	अदाम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	____	अत्ताम्	____
मध्यमपुरुषः	अद्धि/अत्तात्	____	अत्त
उत्तमपुरुषः	____	अदाव	____

लङ्-लकारः (भूतकालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	आदत्	आत्ताम्	आदन्
मध्यमपुरुषः	आदः	आत्तम्	आत्त
उत्तमपुरुषः	आदम्	आद्व	आद्म

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	आदत्	____	आदन्
मध्यमपुरुषः	____	आत्तम्	____
उत्तमपुरुषः	आदम्	____	आद्म

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विधिलिङ्-लकारः (विध्यर्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अद्यात्	अद्याताम्	अद्युः
मध्यमपुरुषः	अद्याः	अद्यातम्	अद्यात
उत्तमपुरुषः	अद्याम्	अद्याव	अद्याम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	____	अद्याताम्	____
मध्यमपुरुषः	अद्याः	____	अद्यात
उत्तमपुरुषः	____	अद्याव	____

हु - दानादानयोः लट्-लकारः (वर्तमान-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	जुहोति	जुहुतः	जुह्वति/जुह्वन्ति
मध्यमपुरुषः	जुहोषि	जुहुथः	जुहुथ
उत्तमपुरुषः	जुहोमि	जुहुवः	जुहुमः

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	जुहोति	____	जुह्वति
मध्यमपुरुषः	____	जुहुथः	____
उत्तमपुरुषः	जुहोमि	____	जुहुमः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लृट्-लकारः (भविष्यत्-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	होष्यति	होष्यतः	होष्यन्ति
मध्यमपुरुषः	होष्यसि	होष्यथः	होष्यथ
उत्तमपुरुषः	होष्यामि	होष्यावः	होष्यामः

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	____	होष्यतः	____
मध्यमपुरुषः	होष्यसि	____	होष्यथ
उत्तमपुरुषः	____	होष्यावः	____

लोट्-लकारः (आज्ञार्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	जुहोतु / जुहुतात्	जुहुताम्	जुहवतु
मध्यमपुरुषः	जुहुधि / जुहुतात्	जुहुताम्	जुहुत
उत्तमपुरुषः	जुहवानि	जुहवाव	जुहवाम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	जुहोतु / जुहुतात्	____	जुहवतु
मध्यमपुरुषः	____	जुहुतम्	____
उत्तमपुरुषः	जुहवानि	____	जुहवाम

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लङ्-लकारः (भूतकालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अजुहोत्	अजुहुताम्	अजुहवुः
मध्यमपुरुषः	अजुहोः	अजुहुतम्	अजुहुत
उत्तमपुरुषः	अजुहवम्	अजुहुव	अजुहुम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	____	अजुहुताम्	____
मध्यमपुरुषः	अजुहोः	____	अजुहुत
उत्तमपुरुषः	____	अजुहुव	____

विधिलिङ्-लकारः (विध्यर्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	जुहुयात्	जुहुयाताम्	जुहुयुः
मध्यमपुरुषः	जुहुयाः	जुहुयातम्	जुहुयात
उत्तमपुरुषः	जुहुयाम्	जुहुयाव	जुहुयाम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	जुहुयात्	____	जुहुयुः
मध्यमपुरुषः	____	जुहुयातम्	____
उत्तमपुरुषः	जुहुयाम्	____	जुहुयाम

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु
लट्-लकारः (वर्तमान-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	दीव्यति	दीव्यतः	दीव्यन्ति
मध्यमपुरुषः	दीव्यसि	दीव्यथः	दीव्यथ
उत्तमपुरुषः	दीव्यामि	दीव्यावः	दीव्यामः

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	____	दीव्यतः	____
मध्यमपुरुषः	दीव्यसि	____	दीव्यथ
उत्तमपुरुषः	____	दीव्यावः	____

लृट्-लकारः (भविष्यत्-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	देविष्यति	देविष्यतः	देविष्यन्ति
मध्यमपुरुषः	देविष्यसि	देविष्यथः	देविष्यथ
उत्तमपुरुषः	देविष्यामि	देविष्यावः	देविष्यामः

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	देविष्यति	____	देविष्यन्ति
मध्यमपुरुषः	____	देविष्यथः	____
उत्तमपुरुषः	देविष्यामि	____	देविष्यामः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लोट्-लकारः (आज्ञार्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	दीव्यतु / दीव्यतात्	दीव्यताम्	दीव्यन्तु
मध्यमपुरुषः	दीव्य / दीव्यतात्	दीव्यतम्	दीव्यत
उत्तमपुरुषः	दीव्यानि	दीव्याव	दीव्याम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	____	दीव्यताम्	____
मध्यमपुरुषः	दीव्यतात्/दीव्य	____	दीव्यत
उत्तमपुरुषः	____	दीव्याव	____

लङ्-लकारः (भूतकालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अदीव्यत्	अदीव्यताम्	अदीव्यन्
मध्यमपुरुषः	अदीव्यः	अदीव्यतम्	अदीव्यत
उत्तमपुरुषः	अदीव्यम्	अदीव्याव	अदीव्याम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	अदीव्यत्	____	अदीव्यन्
मध्यमपुरुषः	____	अदीव्यतम्	____
उत्तमपुरुषः	अदीव्यम्	____	अदीव्याम

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विधिलिङ्-लकारः (विध्यर्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	दीव्येत्	दीव्येताम्	दीव्येयुः
मध्यमपुरुषः	दीव्येः	दीव्येतम्	दीव्येत
उत्तमपुरुषः	दीव्येयम्	दीव्येव	दीव्येम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	____	दीव्येताम्	____
मध्यमपुरुषः	दीव्येः	____	दीव्येत
उत्तमपुरुषः	____	दीव्येव	____

सु(षुञ्)-अभिषवे लट्-लकारः (वर्तमान-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	सुनोति	सुनुतः	सुन्वन्ति
मध्यमपुरुषः	सुनोषि	सुनुथः	सुनुथ
उत्तमपुरुषः	सुनोमि	सुन्वः/सुनुवः	सुन्मः/सुनुमः

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	सुनोति	____	सुन्वन्ति
मध्यमपुरुषः	____	सुनुथः	____
उत्तमपुरुषः	सुनोमि	____	सुन्मः/सुनुमः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लृट्-लकारः (भविष्यत्-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	सोष्यति	सोष्यतः	सोष्यन्ति
मध्यमपुरुषः	सोष्यसि	सोष्यथः	सोष्यथ
उत्तमपुरुषः	सोष्यामि	सोष्यावः	सोष्यामः

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	____	सोष्यतः	____
मध्यमपुरुषः	सोष्यसि	____	सोष्यथ
उत्तमपुरुषः	____	सोष्यावः	____

लोट्-लकारः (आज्ञार्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	सुनोतु / सुनुतात्	सुनुताम्	सुन्वन्तु
मध्यमपुरुषः	सुनु / सुनुतात्	सुनुतम्	सुनुत
उत्तमपुरुषः	सुनवानि	सुनवाव	सुनवाम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	सुनोतु / सुनुतात्,	____	सुन्वन्तु
मध्यमपुरुषः	____	सुनुतम्	____
उत्तमपुरुषः	सुनवानि	____	सुनवाम

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लङ्-लकारः (भूतकालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	असुनोत्	असुनुताम्	असुन्वन्
मध्यमपुरुषः	असुनोः	असुनुतम्	असुनुत
उत्तमपुरुषः	असुनवम्	असुन्व/असुनुव	असुन्म/असुनुम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	____	असुनुताम्	____
मध्यमपुरुषः	असुनोः	____	असुनुत
उत्तमपुरुषः	____	असुन्व/असुनुव	____

विधिलिङ्-लकारः (विध्यर्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	सुनुयात्	सुनुयाताम्	सुनुयुः
मध्यमपुरुषः	सुनुयाः	सुनुयातम्	सुनुयात
उत्तमपुरुषः	सुनुयाम्	सुनुयाव	सुनुयाम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	सुनुयात्	____	सुनुयुः
मध्यमपुरुषः	____	सुनुयातम्	____
उत्तमपुरुषः	सुनुयाम्	____	सुनुयाम

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लघुसिद्धान्तकौमुदी

अथाच्सन्धिः

इको यणचि ॥ पा. ६.१.७७ ॥

पदपरिचयः – इकः इति षष्ठ्यैकवचनान्तं पदम्। यण् इति प्रथमैकवचनान्तं पदम्। अचि इति सप्तम्यैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

अनुवृत्तिः – संहितायाम्।

वृत्तिः – इकः स्थाने यण् स्यादचि संहितायां विषये। सुधी उपास्य इति स्थिते।।

तस्मिन्निति निर्दिष्टे पूर्वस्य ॥ पा. १.१.६६ ॥

पदपरिचयः – तस्मिन् इति सप्तम्यैकवचनान्तं पदम्। इति इति अव्ययपदम्। निर्दिष्टे इति सप्तम्यैकवचनान्तं पदम्। पूर्वस्य इति षष्ठ्यैकवचनान्तं पदम्। चतुष्पदमिदं सूत्रम्।

वृत्तिः – सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम्।।

स्थानेऽन्तरतमः ॥ पा. १.१.५० ॥

पदपरिचयः – स्थाने इति सप्तम्यैकवचनान्तं पदम्। अन्तरतमः इति प्रथमैकवचनान्तं पदम्। द्विपदमिदं सूत्रम्।

अनुवृत्तिः – स्थाने।

वृत्तिः – प्रसङ्गे सति सदृशतम आदेशः स्यात्। सुध्य् उपास्य इति जाते ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अनचि च ॥ पा. ८.४.४७ ॥

पदपरिचयः - अनचि इति सप्तम्यैकवचनान्तं पदम्। च इति अव्ययपदम्। द्विपदमिदं सूत्रम्।

समासः - न अच् अनच् तस्मिन् अनचि नञ्तत्पुरुषः।

अनुवृत्तिः - अचो द्वे, यरो वा, संहितायाम्।

वृत्तिः - अचः परस्य यरो द्वे वा स्तो न त्वचि। इति धकारस्य द्वित्वेन सुध्ध्य् उपास्य इति जाते ॥

झलां जश् झशि ॥ पा. ८.४.५३ ॥

पदपरिचयः - झलाम् इति षष्ठीबहुवचनान्तं पदम्। जश् इति प्रथमैकवचनान्तं पदम्। झशि इति सप्तम्यैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

अनुवृत्तिः - संहितायाम्।

वृत्तिः - स्पष्टम्। इति पूर्वधकारस्य दकारः ॥

संयोगान्तस्य लोपः ॥ पा. ८.२.२३ ॥

पदपरिचयः - संयोगान्तस्य इति षष्ठ्यैकवचनान्तं पदम्। लोपः इति प्रथमैकवचनान्तं पदम्।

समासः - संयोगः अन्ते यस्य तत् संयोगान्तं तस्य संयोगान्तस्य बहुव्रीहिसमासः।

अनुवृत्तिः - पदस्य।

वृत्तिः - संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात् ॥

अलोऽन्त्यस्य ॥ पा. १.१.५२ ॥

पदपरिचयः - अलः इति षष्ठ्यैकवचनान्तं पदम्। अन्त्यस्य इति षष्ठ्यैकवचनान्तं पदम्।

अनुवृत्तिः - षष्ठी।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वृत्तिः - षष्ठीनिर्दिष्टोऽन्त्यस्याल आदेशः स्यात्। इति यलोपे प्राप्ते - ***(यणः प्रतिषेधो वाच्यः)***। सुद्ध्युपास्यः। मद्ध्वरिः। धात्त्रंशः। लाकृतिः ।।

एचोऽयवायावः ॥ पा. ६.१.७८ ॥

पदपरिचयः - एचः इति षष्ठ्यैकवचनान्तं पदम्। अयवायावः इति प्रथमाबहुवचनान्तं पदम्। द्विपदमिदं सूत्रम्।

समासः - अय् च अव् च् आय् च आव् च अयवायावः इतरेतरद्वन्द्वसमासः।

अनुवृत्तिः - अचि, संहितायाम्।

वृत्तिः - एचः क्रमादय् अव् आय् आव् एते स्युरचि ।।

यथासङ्ख्यमनुदेशः समानाम् ॥ पा. १.३.१० ॥

पदपरिचयः - यथासङ्ख्यम् इति अव्ययपदम्। अनुदेशः इति प्रथमैकवचनान्तं पदम्। समानाम् इति षष्ठीबहुवचनान्तं पदम्।

समासः - सङ्ख्यामनतिक्रम्य यथासङ्ख्यम् अव्ययीभावसमासः।

वृत्तिः - समसम्बन्धी विधिर्यथासङ्ख्यं स्यात्। हरये। विष्णवे। नायकः। पावकः।।

वान्तो यि प्रत्यये ॥ पा. ६.१.७९ ॥

पदपरिचयः - वान्तः इति प्रथमैकवचनान्तं पदम्। यि इति सप्तम्यैकवचनान्तं पदम्। प्रत्यये इति सप्तम्यैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

समासः - वकारोऽन्ते यस्य स वान्तः बहुव्रीहिसमासः।

अनुवृत्तिः - एचः, अचि, संहितायाम्।

वृत्तिः - यकारादौ प्रत्यये परे ओदौतोरव् आव् एतौ स्तः। गव्यम्। नाव्यम्। ***(अध्वपरिमाणे च)***। गव्यूतिः ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अदेङ् गुणः ॥ पा. १.१.२ ॥

पदपरिचयः - अदेङ् इति प्रथमैकवचनान्तं पदम्। गुणः इति प्रथमैकवचनान्तं पदम्।
समासः - अत् च एङ् च अदेङ् समाहारद्वन्द्वसमासः।
वृत्तिः - अत् एङ् च गुणसञ्ज्ञः स्यात् ॥

तपरस्तत्कालस्य ॥ पा. १.१.७० ॥

पदपरिचयः - तपरः इति प्रथमैकवचनान्तं पदम्। तत्कालस्य इति षष्ठ्यैकवचनान्तं पदम्। द्विपदमिदं सूत्रम्।
समासः - तः परो यस्मात् सः तपरः बहुव्रीहिसमासः। अथवा तात् परः तपरः पञ्चमीतत्पुरुषः। तस्य कालः इति तत्कालः षष्ठीतत्पुरुषः। तस्य कालः यस्य स तत्कालः उत्तरपदलोपी बहुव्रीहिसमासः।
अनुवृत्तिः - सवर्णस्य, स्वं रूपम्।
वृत्तिः - तः परो यस्मात्स च तात्परश्चोच्चार्यमाण समकालस्यैव सञ्ज्ञा स्यात्॥

आद्गुणः ॥ पा. ६.१.८७ ॥

पदपरिचयः - आत् इति पञ्चम्यैकवचनान्तं पदम्। गुणः इति प्रथमैकवचनान्तं पदम्। द्विपदमिदं सूत्रम्।
अनुवृत्तिः - एकः पूर्वपरयोः, अचि, संहितायाम्।
वृत्तिः - अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात्। उपेन्द्रः। गङ्गोदकम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उपदेशेऽजनुनासिक इत् ॥ पा. १.३.२ ॥

पदपरिचयः - उपदेशे इति सप्तम्यैकवचनान्तं पदम्। अच् इति प्रथमैकवचनान्तं पदम्। अनुनासिकः इति प्रथमैकवचनान्तं पदम्। इत् इति प्रथमैकवचनान्तं पदम्। चतुष्पदमिदं सूत्रम्।

वृत्तिः - उपदेशेऽनुनासिकोऽजित्सञ्ज्ञः स्यात्। ***प्रतिज्ञानुनासिक्याः पाणिनीयाः।*** लण्सूत्रस्थाऽवर्णेन सहोच्चार्यमाणो रेफो रलयोः सञ्ज्ञा।।

उरण् रपरः ॥ पा. १.१.५१ ॥

पदपरिचयः - उः इति षष्ठ्यैकवचनान्तं पदम्। अण् इति प्रथमैकवचनान्तं पदम्। रपरः इति प्रथमैकवचनान्तं पदम्।

समासः - रः परो यस्मात् स रपरः बहुव्रीहिसमासः।

अनुवृत्तिः - स्थाने।

वृत्तिः - ॠ इति त्रिंशतः सञ्ज्ञेत्युक्तम्। तत्स्थाने योऽण् स रपरः सन्नेव प्रवर्तते। कृष्णर्द्धिः। तवल्कारः ॥

लोपः शाकल्यस्य ॥ पा. ८.३.१९ ॥

पदपरिचयः - लोपः इति प्रथमैकवचनान्तं पदम्। शाकल्यस्य इति षष्ठ्यैकवचनान्तं पदम्।

अनुवृत्तिः - व्योः, अपूर्वस्य अशि, पदस्य, संहितायाम्।

वृत्तिः - अवर्णपूर्वयोः पदान्तयोर्यवयोर्लोपो वाऽशि परे ॥

पूर्वत्रासिद्धम् ॥ पा.८.२.१ ॥

पदपरिचयः- पूर्वत्र इति अव्ययपदम्। असिद्धम् इति प्रथमैकवचनान्तं पदम्।

समासः - न सिद्धम् असिद्धं नञ्तत्पुरुषसमासः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वृत्तिः - सपादसप्ताध्यायीं ' प्रति त्रिपाद्यसिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात्। हर इह, हरयिह। विष्ण इह, विष्णविह ॥

वृद्धिरादैच् ॥ पा. १.१.१ ॥

पदपरिचयः - वृद्धिः इति प्रथमैकवचनान्तं पदम्। आदैच् इति प्रथमैकवचनान्तं पदम्। द्विपदमिदं सूत्रम्।

समासः - आत् च ऐत् च इति आदैच् समाहारद्वन्द्वसमासः।

वृत्तिः - आदैच्च वृद्धिसञ्ज्ञः स्यात् ॥

वृद्धिरेचि ॥ पा. ६.१.८८ ॥

पदपरिचयः - वृद्धिः इति प्रथमैकवचनान्तं पदम्। एचि इति सप्तम्यैकवचनान्तं पदम्। द्विपदमिदं सूत्रम्।

अनुवृत्तिः - आत्, एकः पूर्वपरयोः, संहितायाम्।

वृत्तिः - आदेचि परे वृद्धिरेकादेशः स्यात्। गुणापवादः। कृष्णैकत्वम्। गङ्गौघः। देवैश्वर्यम्। कृष्णौत्कण्ठ्यम् ॥

एत्येधत्यूठ्सु ॥ पा. ६.१.८९ ॥

पदपरिचयः - एत्येधत्यूठ्सु इति सप्तम्यैकवचनान्तं पदम्। एकपदमिदं सूत्रम्।

समासः - एतिश्च एधतिश्च ऊठ् च इति एत्येधत्यूठः तेषु एत्येधत्यूठ्सु इतरेतरद्वन्द्वसमासः।

अनुवृत्तिः - वृद्धिरेचि, अचि, आत्, एकः पूर्वपरयोः, संहितायाम्।

वृत्तिः - अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात्। उपैति। उपैधते। प्रष्ठौहः। एजाद्योः किम् ? उपेतः। मा भवान्प्रेदिधत्। ***(अक्षादूहिन्यामुपसङ्ख्यानम्)*** । अक्षौहणी सेना। ***(प्रादूहोढोढ्येषैष्येषु)***। प्रौहः। प्रौढः। प्रौढिः। प्रैषः। प्रैष्यः। ***(ऋते च तृतीयासमासे)***। सुखेन ऋतः सुखार्तः। तृतीयेति किम् ? परमर्तः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(प्रवत्सतरकम्बलवसनार्णदशानामृणे) प्रार्णम्, वत्सतरार्णम्, इत्यादि।

उपसर्गाः क्रियायोगे ॥ पा. १.४.५९ ॥

पदपरिचयः – उपसर्गाः इति प्रथमाबहुवचनान्तं पदम्। क्रियायोगे इति सप्तम्यैकवचनान्तं पदम्। द्विपदमिदं सूत्रम्।

समासः – क्रियया योगः क्रियायोगः तस्मिन् क्रियायोगे तृतीयातत्पुरुषसमासः।

अनुवृत्तिः – असत्वे, निपाताः।

वृत्तिः – प्रादयः क्रियायोगे उपसर्गसञ्ज्ञाः स्युः। प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप – एते प्रादयः ॥

भूवादयो धातवः ॥ पा. १.३.१ ॥

पदपरिचयः – भूवादयः इति प्रथमाबहुवचनान्तं पदम्। धातवः इति प्रथमाबहुवचनान्तं पदम्। द्विपदमिदं सूत्रम्।

समासः – भूश्च वाश्च भुवौ, भुवौ आदी येषां ते भूवादयः द्वन्द्वगर्भो बहुव्रीहिसमासः।

वृत्तिः – क्रियावाचिनो भ्वादयो धातुसञ्ज्ञाः स्युः ॥

उपसर्गादृति धातौ ॥ पा. ६.१.९१ ॥

पदपरिचयः – उपसर्गात् इति पञ्चम्यैकवचनान्तं पदम्। ऋति इति सप्तम्यैकवचनान्तं पदम्। धातौ इति सप्तम्यैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

अनुवृत्तिः – वृद्धिः, आत्, एकः पूर्वपरयोः, अचि, संहितायाम्।

वृत्तिः – अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात्। प्रार्च्छति ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एङि पररूपम् ॥ पा. ६.१.९४ ॥

पदपरिचयः – एङि इति सप्तम्यैकवचनान्तं पदम्। पररूपम् इति प्रथमैकवचनान्तं पदम्। द्विपदमिदं सूत्रम्।

अनुवृत्तिः – उपसर्गात्, धातौ, आत्, एकः पूर्वपरयोः, संहितायाम्।

वृत्तिः – आदुपसर्गादेङादौ धातौ परे पररूपमेकादेशः स्यात्। प्रेजते। उपोषति।।

अचोऽन्त्यादि टि ॥ पा. १.१.६४ ॥

पदपरिचयः – अचः इति षष्ठ्यैकवचनान्तं पदम्। अन्त्यादि इति प्रथमैकवचनान्तं पदम्। टि इति प्रथमैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

समासः – अन्त्य आदिर्यस्य तद् अन्त्यादि बहुव्रीहिसमासः।

वृत्तिः – अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसञ्ज्ञं स्यात्। *(शकन्ध्वादिषु पररूपं वाच्यम्)*। तच्च टेः। शकन्धुः। कर्कन्धुः। मनीषा। आकृतिगणोऽयम्। मार्त्तण्डः।।

ओमाङोश्च ॥ पा. ६.१.९५ ॥

पदपरिचयः – ओमाङोः इति सप्तमीद्विवचनान्तं पदम्। च इति अव्ययपदम्। द्विपदमिदं सूत्रम्।

समासः – ओम् च आङ् च इति ओमाङौ तयोः ओमाङोः इतरेतरद्वन्द्वसमासः।

अनुवृत्तिः – पररूपम्, आत्, एकः पूर्वपरयोः, संहितायाम्।

वृत्तिः – ओमि आङि चात्परे पररूपमेकादेशः स्यात्। शिवायों नमः। शिव एहि ।।

अन्तादिवच्च ॥ पा. ६.१.८५ ॥

पदपरिचयः – अन्तादिवत् इति अव्ययपदम्। च इति अव्ययपदम्। द्विपदमिदं सूत्रम्।

समासः – अन्तश्च आदिश्च अन्तादी इतरेतरद्वन्द्वसमासः।

अनुवृत्तिः – एकः पूर्वपरयोः।

वृत्तिः – योऽयमेकादेशः स पूर्वस्यान्तवत्परस्यादिवत् स्यात्। शिवेहि ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अकः सवर्णे दीर्घः ॥ पा. ६.१.१०१ ॥

पदपरिचयः - अकः इति पञ्चम्यैकवचनान्तं पदम्। सवर्णे इति सप्तम्यैकवचनान्तं पदम्। दीर्घः इति प्रथमैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

अनुवृत्तिः - अचि, एकः पूर्वपरयोः, संहितायाम्।

वृत्तिः - अकः सवर्णेऽचि परे पूर्वपरयोर्दीर्घ एकादेशः स्यात्। दैत्यारिः। श्रीशः। विष्णूदयः। होतॄकारः ॥

एङः पदान्तादति ॥ पा. ६.१.१०९ ॥

पदपरिचयः - एङः इति पञ्चम्यैकवचनान्तं पदम्। पदान्तात् इति पञ्चम्यैकवचनान्तं पदम्। अति सप्तम्यैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

समासः - पदस्य अन्तः पदान्तः तस्मात् पदान्तात् षष्ठीतत्पुरुषसमासः।

अनुवृत्तिः - पूर्वः, एकः पूर्वपरयोः, संहितायाम्।

वृत्तिः - पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात्। हरेऽव। विष्णोऽव ॥

सर्वत्र विभाषा गोः ॥ पा. ६.१.१२२ ॥

पदपरिचयः - सर्वत्र इति अव्ययपदम्। विभाषा इति प्रथमैकवचनान्तं पदम्। गोः इति षष्ठ्यैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

अनुवृत्तिः - प्रकृत्या, एङः पदान्ताद् अति, संहितायाम्।

वृत्तिः - लोके वेदे चैङन्तस्य गोरति वा प्रकृतिभावः स्यात् पदान्ते। गोअग्रम्, गोऽग्रम्। एङन्तस्य किम् ? चित्रग्वग्रम्। पदान्ते किम् ? गोः ॥

अनेकाल्शित्सर्वस्य ॥ पा. १.१.५५ ॥

पदपरिचयः - अनेकाल्शित् इति प्रथमैकवचनान्तं पदम्। सर्वस्य इति षष्ठ्यैकवचनान्तं पदम्। द्विपदमिदं सूत्रम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

समासः – न एकः इति अनेकः नञ्तत्पुरुषसमासः। अनेकः अल् यस्य स अनेकाल् बहुव्रीहिसमासः। श इत् यस्य स शित् बहुव्रीहिसमासः। अनेकाल् च शिच्च इति अनेकाल्शित् बहुव्रीहिगर्भसमाहारद्वन्द्वसमासः।

अनुवृत्तिः – षष्ठी।

वृत्तिः – (अनेकाल् य आदेशः शिदादेशश्च स सर्वस्य षष्ठीनिर्दिष्टस्य स्थाने स्यात्।) इति प्राप्ते॥

ङिच्च ॥ पा. १.१.५३ ॥

पदपरिचयः – ङित् इति प्रथमैकवचनान्तं पदम्। च इति अव्ययपदम्। द्विपदमिदं सूत्रम्।

समासः – ङ् इत् यस्य स ङित् बहुव्रीहिसमासः।

अनुवृत्तिः – अलोऽन्त्यस्य षष्ठी।

वृत्तिः – ङिदनेकालप्यन्त्यस्यैव स्यात् ।।ड

अवङ् स्फोटायनस्य ॥ पा. ६.१.१२३ ॥

पदपरिचयः – अवङ् इति प्रथमैकवचनान्तं पदम्। स्फोटायनस्य इति षष्ठ्यैकवचनान्तं पदम्। द्विपदमिदं सूत्रम्।

अनुवृत्तिः – गोः, विभाषा, अचि, पदान्तात्, संहितायाम्।

वृत्तिः – पदान्ते एङन्तस्य गोरवङ् वा स्यादचि। गवाग्रम्, गोऽग्रम्। पदान्ते किम् ? गवि ॥

इन्द्रे च ॥ पा. ६.१.१२४ ॥

पदपरिचयः – इन्द्रे इति सप्तम्यैकवचनान्तं पदम्। च इति अव्ययपदम्। द्विपदमिदं सूत्रम्।

अनुवृत्तिः – अवङ्, गोः, अचि, संहितायाम्।

वृत्तिः – गोरवङ् स्यादिन्द्रे। गवेन्द्रः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दूराद्धूते च ॥ पा. ८.२.८४ ॥

पदपरिचयः – दूरात् इति पञ्चम्यैकवचनान्तं पदम्। हूते इति सप्तम्यैकवचनान्तं पदम्। च इति अव्ययपदम्। त्रिपदमिदं सूत्रम्।

अनुवृत्तिः – वाक्यस्य टेः प्लुत उदात्तः, पदस्य

वृत्तिः – दूरात्सम्बोधने वाक्यस्य टेः प्लुतो वा स्यात्।।

प्लुतप्रगृह्या अचि नित्यम् ॥ पा. ६.१.१२५ ॥

पदपरिचयः – प्लुतप्रगृह्याः इति प्रथमाबहुवचनान्तं पदम्। अचि इति सप्तम्यैकवचनान्तं पदम्। नित्यम् इति प्रथमैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

समासः – प्लुताश्च प्रगृह्याश्च इति प्लुतप्रगृह्याः इतरेतरद्वन्द्वसमासः।

अनुवृत्तिः – प्रकृत्या संहितायाम्।

वृत्तिः – एतेऽचि प्रकृत्या स्युः। आगच्छ कृष्ण ३, अत्र गौश्चरति ।।

ईदूदेद्द्विवचनं प्रगृह्यम् ॥ पा. १.१.११ ॥

पदपरिचयः – ईदूदेद् इति प्रथमैकवचनान्तं पदम्। द्विवचनम् इति प्रथमैकवचनान्तं पदम्। प्रगृह्यम् इति प्रथमैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

समासः – ईत् च ऊत् च एत् च इति ईदूदेद् समाहारद्वन्द्वसमासः।

वृत्तिः – ईदूदेदन्तं द्विवचनं प्रगृह्यं स्यात्। हरी एतौ। विष्णू इमौ। गङ्गे अमू।।

अदसो मात् ॥ पा. १.१.१२ ॥

पदपरिचयः – अदसः इति षष्ठ्यैकवचनान्तं पदम्। मात् इति पञ्चम्यैकवचनान्तं पदम्। द्विपदमिदं सूत्रम्।

अनुवृत्तिः – ईदूदेत्, प्रगृह्यम्।

वृत्तिः – अस्मात्परावीदूतौ प्रगृह्यौ स्तः। अमी ईशाः। रामकृष्णावमू आसाते। मात्किम् ? अमुकेऽत्र ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चादयोऽसत्त्वे ॥ पा. १.४.५७ ॥

पदपरिचयः – चादयः इति प्रथमाबहुवचनान्तं पदम्। असत्त्वे इति सप्तम्यैकवचनान्तं पदम्। द्विपदमिदं सूत्रम्।

समासः – च आदिर्येषां ते चादयः बहुव्रीहिसमासः। न सत्त्वम् असत्त्वं तस्मिन् असत्त्वे नञ्तत्पुरुषसमासः।

अनुवृत्तिः – निपाताः।

वृत्तिः – अद्रव्यार्थाश्चादयो निपाताः स्युः ॥

प्रादयः ॥ पा. १.४.५८ ॥

पदपरिचयः – प्रादयः इति प्रथमाबहुवचनान्तं पदम्। एकपदमिदं सूत्रम्।

समासः – प्र आदिर्येषां ते प्रादयः बहुव्रीहिसमासः।

अनुवृत्तिः – असत्त्वे, निपाताः।

वृत्तिः – एतेऽपि तथा स्युः॥

निपात एकाजनाङ् ॥ पा. १.१.१४ ॥

पदपरिचयः – निपातः इति प्रथमैकवचनान्तं पदम्। एकाच् इति प्रथमैकवचनान्तं पदम्। अनाङ् इति प्रथमैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

समासः – एकश्च असौ अच्च इति एकाच् कर्मधारयसमासः। न आङ् इति अनाङ् नञ्तत्पुरुषसमासः।

अनुवृत्तिः – प्रगृह्यम्।

वृत्तिः – एकोऽज् निपात आङ्वर्जः प्रगृह्यः स्यात्। इ इन्द्रः। उ उमेशः। वाक्यस्मरणयोरङित्। आ एवं नु मन्यसे। आ एवं किल तत्। अन्यत्र ङित्। ईषदुष्णम् ओष्णम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ओत् ॥ पा. १.१.१५ ॥

पदपरिचयः - ओत् इति प्रथमैकवचनान्तं पदम्।
अनुवृत्तिः - निपातः, प्रगृह्यम्।
वृत्तिः - ओदन्तो निपातः प्रगृह्यः स्यात्। अहो ईशाः ॥

सम्बुद्धौ शाकल्यस्येतावनार्षे ॥ पा. १.१.१६ ॥

पदपरिचयः - सम्बुद्धौ इति सप्तम्यैकवचनान्तं पदम्। शाकल्यस्य इति षष्ठ्यैकवचनान्तं पदम्। इतौ इति सप्तम्यैकवचनान्तं पदम्। अनार्षे इति सप्तम्यैकवचनान्तं पदम्। चतुष्पदमिदं सूत्रम्।
समासः - न आर्षः इति अनार्षः तस्मिन् अनार्षे नञ्तत्पुरुषसमासः।
अनुवृत्तिः - ओत्, प्रगृह्यम्।
वृत्तिः - सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्यो ऽवैदिके इतौ परे। विष्णो इति, विष्ण इति, विष्णविति ॥

मय उञो वो वा ॥ पा. ८.३.३३ ॥

पदपरिचयः - मयः इति पञ्चम्यैकवचनान्तं पदम्। उञः इति षष्ठ्यैकवचनान्तं पदम्। वः इति प्रथमैकवचनान्तं पदम्। वा इति अव्ययपदम्।
अनुवृत्तिः - अचि, संहितायाम्।
वृत्तिः - मयः परस्य उञो वो वा स्यादचि। किम्वुक्तम्, किमु उक्तम् ॥

इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ॥ पा. ६.१.१२७ ॥

पदपरिचयः - इकः इति प्रथमाबहुवचनान्तं पदम्। असवर्णे इति सप्तम्यैकवचनान्तं पदम्। शाकल्यस्य इति षष्ठ्यैकवचनान्तं पदम्। ह्रस्वः इति प्रथमैकवचनान्तं पदम्। च इति अव्ययपदम्। पञ्चपदमिदं सूत्रम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

समासः – न सवर्णः असवर्णः तस्मिन् असवर्णे नञ्तत्पुरुषः।

अनुवृत्तिः – अचि, प्रकृत्या, संहितायाम्।

वृत्तिः – पदान्ता इको ह्रस्वा वा स्युरसवर्णेऽचि। ह्रस्वविधिसामर्थ्यान्न स्वरसन्धिः। चक्रि अत्र, चक्र्यत्र। पदान्ता इति किम् ? गौर्यौ।

अचो रहाभ्यां द्वे ॥ पा. ८.४.४६ ॥

पदपरिचयः – अचः इति पञ्चम्यैकवचनान्तं पदम्। रहाभ्यां इति पञ्चमीद्विवचनान्तं पदम्। द्वे इति प्रथमाद्विवचनान्तं पदम्।

समासः – रश्च हश्च इति रहौ ताभ्यां रहाभ्यां इतरेतरद्वन्द्वसमासः।

अनुवृत्तिः – यरो, वा, संहितायाम्।

वृत्तिः – अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः। गौर्य्यौ। ***(न समासे)***। वाप्यश्वः ॥

ऋत्यकः ॥ पा. ६.१.१२८ ॥

पदपरिचयः – ऋति इति सप्तम्यैकवचनातं पदम्। अकः इति प्रथमाबहुवचनान्तं पदम्। द्विपदमिदं सूत्रम्।

अनुवृत्तिः – शाकल्यस्य ह्रस्वश्च, प्रकृत्या, संहितायाम्।

वृत्तिः – ऋति परे पदान्ता अकः प्राग्वद्वा। ब्रह्म ऋषिः, ब्रह्मर्षिः। पदान्ताः किम् ? आर्च्छत्।

इत्यच्सन्धिः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ हल् सन्धिः

स्तोः श्चुना श्चुः ॥ पा. ८.४.४० ॥

पदपरिचयः - स्तोः इति षष्ठ्यैकवचनान्तं पदम्। श्चुना इति तृतीयैकवचनान्तं पदम्। श्चुः इति प्रथमैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

समासः - सश्च तुश्च इति स्तुः तस्य स्तोः समाहारद्वन्द्वसमासः। शश्च चुश्च श्चुः तेन श्चुना समाहारद्वन्द्वसमासः।

अनुवृत्तिः - संहितायाम्।

वृत्तिः - सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः। रामश्शेते। रामश्चिनोति। सच्चित्। शार्ङ्गिञ्जय ॥

शात् ॥ पा. ८.४.४४ ॥

पदपरिचयः - शात् इति पञ्चम्यैकवचनान्तं पदम्। एकपदमिदं सूत्रम्।

अनुवृत्तिः - तोः , न, संहितायाम्।

वृत्तिः - शात्परस्य तवर्गस्य चुत्वं न स्यात्। विश्नः। प्रश्नः ॥

ष्टुना ष्टुः ॥ पा. ८.४.४१ ॥

पदपरिचयः - ष्टुना इति तृतीयैकवचनान्तं पदम्। ष्टुः इति प्रथमैकवचनान्तं पदम्। द्विपदमिदं सूत्रम्।

समासः - षश्च टुश्च ष्टुः तेन ष्टुना समाहारद्वन्द्वसमासः।

अनुवृत्तिः - स्तोः, संहितायाम्।

वृत्तिः - स्तोः ष्टुना योगे ष्टुः स्यात्। रामष्षष्ठः। रामष्टीकते। पेष्टा। तट्टीका। चक्रिण्ढौकसे ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न पदान्ताट्टोरनाम् ॥ पा. ८.४.४२ ॥

पदपरिचयः – न इति अव्ययपदम्। पदान्तात् इति पञ्चम्यैकवचनान्तं पदम्। अनाम् इति लुप्तषष्ठ्यन्तनिर्देशः। त्रिपदमिदं सूत्रम्।

समासः – पदस्य अन्तः पदान्तः तस्मात् पदान्तात् षष्ठीतत्पुरुषसमासः। न आम् इति अनाम् नञ्तत्पुरुषः।

अनुवृत्तिः – ष्टुः, स्तोः, संहितायाम्।

वृत्तिः – पदान्ताट्टवर्गात्परस्यानामः स्तोः ष्टुर्न स्यात्। षट् सन्तः। षट् ते। पदान्तात्किम् ? ईट्टे। टोः किम् ? सर्पिष्टमम्। ***(अनाम्नवतिनगरीणामिति वाच्यम्)***। षण्णवतिः। षण्णगर्य्यः ॥

तोः षि ॥ पा. ८.४.४३ ॥

पदपरिचयः – तोः इति षष्ठ्यैकवचनान्तं पदम्। षि इति सप्तम्यैकवचनान्तं पदम्। द्विपदमिदं सूत्रम्।

अनुवृत्तिः – न, संहितायाम्।

वृत्तिः – तवर्गस्य षकारे परे न ष्टुत्वम्। सन्षष्ठः ॥

झलां जशोऽन्ते ॥ पा. ८.२.३९ ॥

पदपरिचयः – झलाम् इति षष्ठीबहुवचनान्तं पदम्। जशः इति प्रथमाबहुवचनान्तं पदम्। अन्ते इति सप्तम्यैकवचनान्तं पदम्।

अनुवृत्तिः – पदस्य।

वृत्तिः – पदान्ते झलां जशः स्युः। वागीशः ॥

यरोऽनुनासिकेऽनुनासिको वा ॥ पा. ८.४.४५ ॥

पदपरिचयः – यरः इति षष्ठ्यैकवचनान्तं पदम्। अनुनासिके इति सप्तम्यैकवचनान्तं पदम्। अनुनासिकः इति प्रथमैकवचनान्तं पदम्। वा इति अव्ययपदम्। चतुष्पदमिदं सूत्रम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अनुवृत्तिः - संहितायाम्, पदान्तात्।

वृत्ति - यरः पदान्तस्यानुनासिके परे ऽनुनासिको वा स्यात्। एतन्मुरारिः, एतद् मुरारिः। *(प्रत्यये भाषायां नित्यम्)*। तन्मात्रम्। चिन्मयम् ॥

तोर्लि ॥ पा. ८.४.६० ॥

पदपरिचयः - तोः इति षष्ठ्यैकवचनान्तं पदम्। लि इति सप्तम्यैकवचनान्तं पदम्। द्विपदमिदं सूत्रम्।

अनुवृत्तिः - परसवर्णः संहितायाम्।

वृत्तिः - तवर्गस्य लकारें परे परसवर्णः स्यात्। तल्लयः। विद्वाँल्लिखति। नस्यानुनासिको लः।

उदः स्थास्तम्भोः पूर्वस्य ॥ पा. ८.४.६१ ॥

पदपरिचयः - उदः इति पञ्चम्यैकवचनान्तं पदम्। स्थास्तम्भोः इति षष्ठीद्विवचनान्तं पदम्। पूर्वस्य इति षष्ठ्यैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

समासः - स्थाश्च स्तम्भश्च स्थास्तम्भौ तयोः स्थास्तम्भोः इतरेतरयोगद्वन्द्वसमासः।

अनुवृत्तिः - सवर्णः संहितायाम्।

वृत्तिः - उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यात्।

तस्मादित्युत्तरस्य ॥ पा. १.१.६७ ॥

पदपरिचयः - तस्मात् इति पञ्चम्यैकवचनान्तं पदम्। इति इति अव्ययपदम्। उत्तरस्य इति षष्ठ्यैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

अनुवृत्तिः - निर्दिष्टे।

वृत्तिः - पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयम्।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आदेः परस्य ॥ पा. १.१.५४ ॥

पदपरिचयः - आदेः इति षष्ठ्यैकवचनान्तं पदम्। परस्य इति षष्ठ्यैकवचनान्तं पदम्। द्विपदमिदं सूत्रम्।

अनुवृत्तिः - अलः षष्ठी।

वृत्तिः - परस्य यद्विहितं तत्तस्यादेबोध्यम्। इति सस्य थः ॥

झरो झरि सवर्णे ॥ पा. ८.४.६५ ॥

पदपरिचयः - झरः इति षष्ठ्यैकवचनान्तं पदम्। झरि इति सप्तम्यैकवचनान्तं पदम्। सवर्णे इति सप्तम्यैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

अनुवृत्तिः - हलः लोपः, अन्यतरस्याम्, संहितायाम्।

वृत्तिः - हलः परस्य झरो वा लोपो वा स्यात् सवर्णे झरि ॥

खरि च ॥ पा. ८.४.५५ ॥

पदपरिचयः - खरि इति सप्तम्यैकवचनान्तं पदम्। च इति अव्ययपदम्। द्विपदमिदं सूत्रम्।

अनुवृत्तिः - चर्, झलां, संहितायाम्।

वृत्तिः - खरि परे झलां चरः स्युः। इत्युदो दस्य तः। उत्थानम्। उत्तम्भनम् ॥

झयो होऽन्यतरस्याम् ॥ पा. ८.४.६२ ॥

पदपरिचयः - झयः इति पञ्चम्यैकवचनान्तं पदम्। हः इति षष्ठ्यैकवचनान्तं पदम्। अन्यतरस्याम् इति सप्तम्यैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

अनुवृत्तिः - पूर्वस्य, सवर्णः, संहितायाम्।

वृत्तिः - झयः परस्य हस्य वा पूर्वसवर्णः स्यात्। नादस्य घोषस्य संवारस्य महाप्राणस्य तादृशो वर्गचतुर्थः। वाग्घरिः, वाग्हरिः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शश्छोऽटि ॥ पा. ८.४.६३ ॥

पदपरिचयः - शः इति षष्ठ्यैकवचनान्तं पदम्। छः इति प्रथमैकवचनान्तं पदम्। अटि इति सप्तम्यैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

अनुवृत्तिः - झयोऽन्यतरस्याम्, संहितायाम्।

वृत्तिः - पदान्ताज्झयः परस्य शस्य छो वा स्यादटि। तद् शिव इत्यत्र दस्य श्चुत्वेन जकारे कृते खरि चेति जकारस्य चकारः। तच्छिवः, तच्शिवः। ***(छत्वममीति वाच्यम्)*** तच्छ्लोकेन ॥

मोऽनुस्वारः ॥ पा. ८.३.२३ ॥

पदपरिचयः - मः इति षष्ठ्यैकवचनान्तं पदम्। अनुस्वारः इति प्रथमैकवचनान्तं पदम्। द्विपदमिदं सूत्रम्।

अनुवृत्तिः - हलि, पदस्य, संहितायाम्।

वृत्तिः - मान्तस्य पदस्यानुस्वारः स्याद्धलि। हरिं वन्दे ॥

नश्चापदान्तस्य झलि ॥ पा. ८.३.२४ ॥

पदपरिचयः - नः इति षष्ठ्यैकवचनान्तं पदम्। च इति अव्ययपदम्। अपदान्तस्य इति षष्ठ्यैकवचनान्तं पदम्। झलि इति सप्तम्यैकवचनान्तं पदम्।

समासः - पदस्य अन्तः इति पदान्तः षष्ठीतत्पुरुषसमासः। न पदान्तः अपदान्तः इति नञ्तत्पुरुषसमासः।

अनुवृत्तिः - मोऽनुस्वारः, संहितायाम्।

वृत्तिः - नस्य मस्य चापदान्तस्य झल्यनुस्वारः स्यात्। यशांसि। आक्रंस्यते। झलि किम् ? मन्यसे॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अनुस्वारस्य ययि परसवर्णः ॥ पा. ८.४.५८ ॥

पदपरिचयः - अनुस्वारस्य इति षष्ठ्यैकवचनान्तं पदम्। ययि इति सप्तम्यैकवचनान्तं पदम्। परसवर्णः इति प्रथमैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

समासः - परस्य सवर्णः इति परसवर्णः षष्ठीतत्पुरुषः।

अनुवृत्तिः - संहितायाम्।

वृत्तिः - स्पष्टम् (अनुस्वारस्य ययि परे परसवर्णः स्यात्)। शान्तः ॥

वा पदान्तस्य ॥ पा. ८.४.५९ ॥

पदपरिचयः - वा इति अव्ययपदम्। पदान्तस्य इति षष्ठ्यैकवचनान्तं पदम्।

समासः - पदस्य अन्तः पदान्तः तस्य पदान्तस्य षष्ठीतत्पुरुषः।

अनुवृत्तिः - अनुस्वारस्य ययि परसवर्णः, संहितायाम्।

वृत्तिः - पदान्तस्यानुस्वारस्य ययि परे परसवर्णो वा स्यात्। त्वङ्करोषि, त्वं करोषि॥

मो राजि समः क्वौ ॥ पा. ८.३.२५ ॥

पदपरिचयः - मः इति प्रथमैकवचनान्तं पदम्। राजि इति सप्तम्यैकवचनान्तं पदम्। समः इति षष्ठ्यैकवचनान्तं पदम्। क्वौ इति सप्तम्यैकवचनान्तं पदम्।

अनुवृत्तिः - मः, पदस्य, संहितायाम्।

वृत्तिः - क्विबन्ते राजतौ परे समो मस्य म एव स्यात्। सम्राट् ॥

हे मपरे वा ॥ पा. ८.३.२६ ॥

पदपरिचयः - हे इति सप्तम्यैकवचनान्तं पदम्। मपरे इति सप्तम्यैकवचनान्तं पदम्। वा इति अव्ययपदम्। त्रिपदमिदं सूत्रम्।

समासः - मः परो यस्मात् स मपरः तस्मिन् मपरे बहुव्रीहिसमासः।

अनुवृत्तिः - मः, मः, पदस्य, संहितायाम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वृत्तिः – मपरे हकारे परे मस्य मो वा स्यात्। किम् ह्मलयति, किं ह्मलयति। *(यवलपरे यवला वा)* कियँ ह्यः, किं ह्यः। किँव् ह्वलयति, किं ह्वलयति। किलँ ह्लादयति। किं ह्लादयति।।

नपरे नः ॥ पा. ८.३.२७ ॥

पदपरिचयः – नपरे इति सप्तम्यैकवचनान्तं पदम्। नः इति प्रथमैकवचनान्तं पदम्। द्विपदमिदं सूत्रम्।

समासः – न परो यस्मात् स नपरः तस्मिन् नपरे बहुव्रीहिसमासः।

अनुवृत्तिः – हे, वा, मः, पदस्य, संहितायाम्।

वृत्तिः – नपरे हकारे परे मस्य नो वा स्यात्। किन् ह्नुते, किं ह्नुते ।।

आद्यन्तौ टकितौ ॥ पा. १.१.४६ ॥

पदपरिचयः – आद्यन्तौ इति प्रथमाद्विवचनान्तं पदम्। टकितौ इति प्रथमाद्विवचनान्तं पदम्। द्विपदमिदं सूत्रम्।

समासः – आदिश्च अन्तश्च आद्यन्तौ इतरेतरयोगद्वन्द्वसमासः। टश्च कश्च टकौ, टकौ इतौ टकितौ द्वन्द्वगर्भो बहुव्रीहिसमासः।

वृत्तिः – टित्कितौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः। षट्त्सन्तः, षट् सन्तः।।

ङ्णोः कुक्टुक् शरि ॥ पा. ८.३.२८ ॥

पदपरिचयः – ङ्णोः इति षष्ठीद्विवचनान्तं पदम्। कुक्टुक् इति प्रथमैकवचनान्तं पदम्। शरि इति सप्तम्यैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

समासः – ङश्च णश्च ङ्णौ तयोः ङ्णोः इतरेतरद्वन्द्वसमासः। कुक् च टुक् च कुक्टुक् समाहारद्वन्द्वसमासः।

अनुवृत्तिः – वा, पदस्य, संहितायाम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वृत्तिः – ङकारणकारयोः कुक्टुकागमौ वा स्तः। *(चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्)*। प्राङ्ख् षष्ठः, प्राङ्क्षष्ठः, प्राङ् षष्ठः। सुगण्ठ् षष्ठः सुगण्ट् षष्ठः, सुगण् षष्ठः।।

डः सि धुट् ।। पा. ८.३.२९ ।।

पदपरिचयः – डः इति पञ्चम्यैकवचनान्तं पदम्। सि इति सप्तम्यैकवचनान्तं पदम्। धुट् इति प्रथमैकवचनान्तं पदम्।

अनुवृत्तिः – वा, पदस्य, संहितायाम्।

वृत्तिः – डात्परस्य सस्य धुड् वा। षट्त्सन्तः, षट् सन्तः ।।

नश्च ।। पा. ८.३.३० ।।

पदपरिचयः – नः इति पञ्चम्यैकवचनान्तं पदम्। च इति अव्ययपदम्।

अनुवृत्तिः – सि धुट्, वा, पदस्य, संहितायाम्।

वृत्तिः – नान्तात्परस्य सस्य धुड् वा स्यात्। सन्त्सः, सन्सः ।।

शि तुक् ।। पा. ८.३.३१ ।।

पदपरिचयः – शि इति सप्तम्यैकवचनान्तं पदम्। तुक् इति प्रथमैकवचनान्तं पदम्।

अनुवृत्तिः – नः, वा, पदस्य, संहितायाम्।

वृत्तिः – पदान्तस्य नस्य शे परे तुग्वा स्यात्। सञ्छम्भुः, सञ्च्छम्भुः, सञ्च्शम्भुः, सञ्शम्भुः ।।

ङमो ह्रस्वादचि ङमुण् नित्यम् ।। पा. ८.३.३२ ।।

पदपरिचयः – ङमः इति पञ्चम्यैकवचनान्तं पदम्। ह्रस्वात् इति पञ्चम्यैकवचनान्तं पदम्। अचि इति सप्तम्यैकवचनान्तं पदम्। ङमुट् इति प्रथमैकवचनान्तं पदम्। नित्यम् इति प्रथमैकवचनान्तं पदम्।

अनुवृत्तिः – पदस्य, संहितायाम्।

वृत्तिः – ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याचो नित्यं ङमुडागमः स्यात्। प्रत्यङ्ङात्मा। सुगण्णीशः। सन्नच्युतः ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

समः सुटि ॥ पा. ८.३.५ ॥

पदपरिचयः - समः इति षष्ठ्यैकवचनान्तं पदम्। सुटि इति सप्तम्यैकवचनान्तं पदम्।

अनुवृत्तिः - रु, पदस्य, संहितायाम्।

वृत्तिः - समो रुः स्यात् सुटि ॥

अत्रानुनासिकः पूर्वस्य तु वा ॥ पा. ८.३.२ ॥

पदपरिचयः - अत्र इति अव्ययपदम्। अनुनासिकः इति प्रथमैकवचनान्तं पदम्। पूर्वस्य इति षष्ठ्यैकवचनान्तं पदम्। तु इति अव्ययपदम्। वा इति अव्ययपदम्। पञ्चपदमिदं सूत्रम्।

अनुवृत्तिः - रु, संहितायाम्।

वृत्तिः - अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा स्यात्।।

अनुनासिकात्परोऽनुस्वारः ॥ पा. ८.३.४ ॥

पदपरिचयः - अनुनासिकात् इति पञ्चम्यैकवचनान्तं पदम्। परः इति प्रथमैकवचनान्तं पदम्। अनुस्वारः इति प्रथमैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

अनुवृत्तिः - पूर्वस्य रु संहितायाम्।

वृत्तिः - अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः स्यात्।।

खरवसानयोर्विसर्जनीयः ॥ पा. ८.३.१५ ॥

पदपरिचयः - खरवसानयोः इति सप्तमीद्विवचनान्तं पदम्। विसर्जनीयः इति प्रथमैकवचनान्तं पदम्। द्विपदमिदं सूत्रम्।

समासः - खर् च अवसानं च खरवसाने तयोः खरवसानयोः इतरेतरद्वन्द्वसमासः।

अनुवृत्तिः - रः, पदस्य, संहितायाम्।

वृत्तिः - खरि अवसाने च पदान्तस्य रेफस्य विसर्गः स्यात्। ***(सम्पुङ्कानां सो वक्तव्यः)***। सँस्स्कर्ता, संस्स्कर्ता ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पुमः खय्यम्परे ॥ पा. ८.३.६ ॥

पदपरिचयः- पुमः इति षष्ठ्यैकवचनान्तं पदम्। खयि इति सप्तम्यैकवचनान्तं पदम्। अम्परे इति सप्तम्यैकवचनान्तं पदम्।

समासः - अम् परो यस्मात् स अम्परः तस्मिन् अम्परे बहुव्रीहिसमासः।

अनुवृत्तिः - रु, पदस्य, संहितायाम्।

वृत्तिः - अम्परे खयि पुमो रुः स्यात्। पुँस्कोकिलः, पुंस्कोकिलः ॥

नश्छव्यप्रशान् ॥ पा. ८.३.७ ॥

पदपरिचयः - नः इति षष्ठ्यैकवचनान्तं पदम्। छवि इति सप्तम्यैकवचनान्तं पदम्। अप्रशान् इति प्रथमैकवचनान्तं पदम् अत्र षष्ठ्यर्थे प्रथमाविभक्तिर्वर्तते। चतुष्पदमिदं सूत्रम्।

समासः - न प्रशान् अप्रशान् नञ्तत्पुरुषसमासः।

अनुवृत्तिः - अम्परे, रु, पदस्य, संहितायाम्।

वृत्तिः - अम्परे छवि नान्तस्य पदस्य रुः स्यात् न तु प्रशान् शब्दस्य ॥

विसर्जनीयस्य सः ॥ पा. ८.३.३४ ॥

पदपरिचयः - विसर्जनीयस्य इति षष्ठ्यैकवचनान्तं पदम्। सः इति प्रथमैकवचनान्तं पदम्।

अनुवृत्तिः - संहितायाम्।

वृत्तिः - खरि विसर्जनीयस्य सः स्यात्। चक्रिंस्त्रायस्व, चक्रिंस्त्रायस्व। अप्रशान् किम् ? प्रशान्तनोति। पदान्तस्येति किम् ? हन्ति ॥

नॄन् पे ॥ पा. ८.३.१० ॥

पदपरिचयः - नॄन् इत्यत्र लुप्तषष्ठ्यन्तनिर्देशः। पे इति सप्तम्यैकवचनान्तं पदम्। द्विपदमिदं सूत्रम्।

अनुवृत्तिः - नः, रु, पदस्य, संहितायाम्।

वृत्तिः - नॄनित्यस्य रुः स्याद्वा पकारे परे ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कुप्वोः ≍क ≍ पौ च ॥ पा. ८.३.३७ ॥

पदपरिचयः- कुप्वोः इति सप्तमीद्विवचनान्तं पदम्। ≍ क ≍ पौ इति प्रथमा. द्विवचनान्तं पदम्। च इति अव्ययपदम्।

समासः - कुश्च पुश्च कुपू तयोः कुप्वोः इतरेतरद्वन्द्वसमासः।

अनुवृत्तिः - विसर्जनीयः, विसर्जनीयस्य, संहितायाम्।

वृत्तिः - कवर्गे पवर्गे च परे विसर्गस्य ≍क ≍ पौ स्तः, चाद्विसर्गः। नॄँ ≍ पाहि, नॄँः पाहि । नॄं ≍ पाहि, नॄंः पाहि। नॄन् पाहि ॥

तस्य परमाम्रेडितम् ॥ पा. ८.१.२ ॥

पदपरिचयः - तस्य इति षष्ठ्यैकवचनान्तं पदम्। परम् इति प्रथमैकवचनान्तं पदम्। आम्रेडितम् इति प्रथमैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

वृत्तिः - द्विरुक्तस्य परं रूपमाम्रेडितं स्यात् ॥

कानाम्रेडिते ॥ पा ८.३.१२ ॥

पदपरिचयः - कान् लुप्तषष्ठ्यन्तनिर्देशः। आम्रेडिते इति सप्तम्यैकवचनान्तं पदम्।

अनुवृत्तिः - नः, रु, पदस्य, संहितायाम्।

वृत्तिः - कान्नकारस्य रुः 'स्यादाम्रेडिते परे। काँस्कान्, कांस्कान् ॥

छे च ॥ पा ६.१.७३ ॥

पदपरिचयः - छे इति सप्तम्यैकवचनान्तं पदम्। च इति अव्ययपदम्।

अनुवृत्तिः - संहितायाम्, ह्रस्वस्य तुक्।

वृत्तिः - ह्रस्वस्य छे परे तुगागमः स्यात्। शिवच्छाया ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पदान्ताद्वा ॥ पा. ६.१.७६ ॥

पदपरिचयः - पदान्तात् इति पञ्चम्यैकवचनान्तं पदम्। वा इति अव्ययपदम्। द्विपदमिदं सूत्रम्।

अनुवृत्तिः - दीर्घात्, छे, संहितायाम्, तुक्।

वृत्तिः - दीर्घात् पदान्तात् छे परे तुग्वा स्यात्। लक्ष्मीच्छाया, लक्ष्मी छाया ॥

इति हल्सन्धिः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ विसर्गसन्धिः

विसर्जनीयस्य सः ॥ पा. ८.३.३४ ॥

पदपरिचयः - विसर्जनीयस्य इति षष्ठ्यैकवचनान्तं पदम्। सः इति प्रथमैकवचनान्तं पदम्।

अनुवृत्तिः - संहितायाम्।

वृत्तिः - खरि विसर्जनीयस्य सः स्यात्। विष्णुस्त्राता ॥

वा शरि ॥ पा. ८.३.३६ ॥

पदपरिचयः - वा इति अव्ययपदम्। शरि इति सप्तम्यैकवचनान्तं पदम्।

अनुवृत्तिः - विसर्जनीयः, विसर्जनीयस्य, संहितायाम्।

वृत्तिः - शरि विसर्गस्य विसर्गो वा स्यात्। हरिः शेते, हरिश्शेते ॥

ससजुषो रुः ॥ पा. ८.२.६६ ॥

पदपरिचयः - ससजुषोः इति षष्ठीद्विवचनान्तं पदम्। रुः इति प्रथमैकवचनान्तं पदम्।

समासः - सश्च सजुष् च इति ससजुषौ तयोः ससजुषोः इतरेतरयोगद्वन्द्वसमासः।

अनुवृत्तिः - पदस्य।

वृत्तिः - पदान्तस्य सस्य सजुषश्च रुः स्यात् ॥

अतो रोरप्लुतादप्लुतादप्लुते ॥ पा. ६.१.११३ ॥

पदपरिचयः - अतः इति पञ्चम्यैकवचनान्तं पदम्। रोः इति षष्ठ्यैकवचनान्तं पदम्। अप्लुतात् इति पञ्चम्यैकवचनान्तं पदम्। अप्लुते इति सप्तम्यैकवचनान्तं पदम्। चतुष्पदमिदं सूत्रम्।

समासः - न प्लुतः इति अप्लुतः तस्मात् अप्लुतात् नञ्तत्पुरुषसमासः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अनुवृत्तिः – उत्, अति, संहितायाम्।

वृत्तिः – अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति। शिवोऽर्च्यः ॥

हशि च ॥ पा. ६.१.११४ ॥

पदपरिचयः – हशि इति सप्तम्यैकवचनान्तं पदम्। च इति अव्ययपदम्। द्विपदमिदं सूत्रम्।

अनुवृत्तिः – अतः, रोः, उत्, संहितायाम्।

वृत्तिः – तथा। शिवो वन्द्यः ॥

भोभगोअघोअपूर्वस्य योऽशि ॥ पा. ८.३.१७ ॥

पदपरिचयः – भोभगोअघोअपूर्वस्य इति षष्ठ्यैकवचनान्तं पदम्। यः इति प्रथमैकवचनान्तं पदम्। अशि इति सप्तम्यैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

समासः – भोश्च भगोश्च अघोश्च अश्च इति भोभगोअघोआः इतरेतरद्वन्द्वसमासः। भोभगोअघोआः पूर्वाः यस्य स भोभगोअघोअपूर्वः तस्य भोभगोअघोअपूर्वस्य बहुव्रीहिसमासः।

अनुवृत्तिः – रोः, रः, संहितायाम्।

वृत्तिः – एतत्पूर्वस्य रोर्यादेशोऽशि। देवा इह, देवायिह। भोस् भगोस् अघोस् इति सान्ता निपाताः। तेषां रोर्यत्वे कृते ॥

हलि सर्वेषाम् ॥ पा. ८.३.२२ ॥

पदपरिचयः – हलि इति सप्तम्यैकवचनान्तं पदम्। सर्वेषाम् इति षष्ठीबहुवचनान्तं पदम्।

अनुवृत्तिः – लोपः, व्योः, भोभगोअघोअपूर्वस्य, पदस्य, संहितायाम्।

वृत्तिः – भोभगोअघोअपूर्वस्य यस्य लोपः स्याद्धलि। भो देवाः। भगो नमस्ते। अघो याहि॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रोऽसुपि ॥ पा. ८.२.६९ ॥

पदपरिचयः - रः इति प्रथमैकवचनान्तं पदम्। असुपि इति सप्तम्यैकवचनान्तं पदम्। द्विपदमिदं सूत्रम्।

समासः - न सुप् असुप् तस्मिन् असुपि नञ्तत्पुरुषः।

अनुवृत्तिः - अहन्।

वृत्तिः - अह्नो रेफादेशो न तु सुपि। अहरहः। अहर्गणः ॥

रो रि ॥ पा. ८.३.१४ ॥

पदपरिचयः - रः इति षष्ठ्यैकवंचनान्तं पदम्। रि इति सप्तम्यैकवचनान्तं पदम्।

अनुवृत्तिः - लोपः, पदस्य, संहितायाम्।

वृत्तिः - रेफस्य रेफे परे लोपः ॥

ढ्रलोपे पूर्वस्य दीर्घोऽणः ॥ पा. ६.३.१११ ॥

पदपरिचयः - ढ्रलोपे इति सप्तम्यैकवचनान्तं पदम्। पूर्वस्य इति षष्ठ्यैकवचनान्तं पदम्। दीर्घः इति प्रथमैकवचनान्तं पदम्। अणः इति प्रथमैकवचनान्तं पदम्। चतुष्पदमिदं सूत्रम्।

समासः - ढकारश्च रेफश्च ढ्रौ तयोः लोपो यस्मिन् इति ढ्रलोपः तस्मिन् ढ्रलोपे द्वन्द्वगर्भबहुव्रीहिसमासः।

वृत्तिः - ढरेफयोर्लोपनिमित्तयोः पूर्वस्याणो दीर्घः। पुना रमते। हरी रम्यः। शम्भू राजते। अणः किम् ? तृढः। वृढः। मनस् रथ इत्यत्र रुत्वे कृते हशि चेत्युत्वे रोरीति लोपे च प्राप्ते ॥

विप्रतिषेधे परं कार्यम् ॥ पा. १.४.२ ॥

पदपरिचयः - विप्रतिषेधे इति सप्तम्यैकवचनान्तं पदम्। परं इति प्रथमैकवचनान्तं पदम्। कार्यम् इति प्रथमैकवचनान्तं पदम्। त्रिपदमिदं सूत्रम्।

वृत्तिः - तुल्यबलविरोधे परं कार्यं स्यात्। इति लोपे प्राप्ते। पूर्वत्रासिद्धमिति रोरीत्यस्यासिद्धत्वादुत्वमेव। मनोरथः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ॥ पा. ६.१.१३२ ॥

पदपरिचयः – एतत्तदोः इति षष्ठीद्विवचनान्तं पदम्। सुलोपः इति प्रथमैकवचनान्तं पदम्। अकोः इति षष्ठीद्विवचनान्तं पदम्। अनञ्समासे इति सप्तम्यैकवचनान्तं पदम्। हलि इति सप्तम्यैकवचनान्तं पदम्। पञ्चपदमिदं सूत्रम्।

समासः – एतच्च तच्च एतत्तदौ तयोः एतत्तदोः इतरेतरद्वन्द्वसमासः। सोर्लोपः सुलोपः षष्ठीतत्पुरुषसमासः। न विद्यते क ययोः तौ अकौ तयोः अकोः बहुव्रीहिसमासः। नञः समासः इति नञ्समासः षष्ठीतत्पुरुषसमासः। न नञ्समासः अनञ्समासः तस्मिन् नञ्समासे नञ्तत्पुरुषसमासः।

अनुवृत्तिः – संहितायाम्।

वृत्तिः – अककारयोरेतत्तदोर्यः सुस्तस्य लोपो हलि न तु नञ्समासे। एष विष्णुः। स शम्भुः। अकोः किम् ? एषको रुद्रः। अनञ्समासे किम्? असः शिवः। हलि किम् ? एषो ऽत्र ॥

सोऽचि लोपे चेत्पादपूरणम् ॥ पा. ६.१.१३४ ॥

पदपरिचयः – सः इत्यत्र षष्ठ्यर्थे प्रथमाविभक्तिः। अचि इति सप्तम्यैकवचनान्तं पदम्। लोपे इति सप्तम्यैकवचनान्तं पदम्। चेत् इति अव्ययपदम्। पादपूरणम् इति प्रथमैकवचनान्तं पदम्।

समासः – पादस्य पूरणं पादपूरणं षष्ठीतत्पुरुषसमासः।

अनुवृत्तिः – सुलोपः, संहितायाम्।

वृत्तिः – स इत्यस्य सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्य्येत। सेमामविड्ढि प्रभृतिम्। सैष दाशरथी रामः ॥

इति विसर्गसन्धिः ॥

इति पञ्चसन्धिप्रकरणम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भर्तृहरिकृतम्

नीतिशतकम्

(आरभ्यतः ३० पर्यन्तम्)

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्त्तये।
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे।।१।।

जो परमात्मा दिशाओं और काल की सीमा में आबद्ध नहीं है, जो अनन्त, चैतन्यस्वरूप है और जो केवल अपने अनुभव के द्वारा ही जाना जा सकता है, उस शान्त, तेजोमय ब्रह्म को नमस्कार है।

SALUTATION to the deity who is not definable in time or space: infinite pure intelligence in incarnate form: who is peace and glory : whose sole essence is self-knowledge.

यां चिन्तयामि सततं मयि सा विरक्ता
साऽप्यन्यमिच्छति जनं स जनोऽन्यसक्तः।
अस्मत्कृते तु परितुष्यति काचिदन्या
धिक्ताञ्च तञ्च मदनञ्च इमाञ्च माञ्च।।२।।

मैं अपने चित्त में रात-दिन जिसकी स्मृति सँजोये रखता हूँ वो मुझसे प्रेम नहीं करती, वो किसी और पुरुष पर मुग्ध है। वह पुरुष किसी अन्य स्त्री में आसक्त है। उस पुरुष की अभिलषित स्त्री मुझ पर प्रसन्न है। इसलिए रानी को,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रानी द्वारा चाहे हुए पुरुष को, उस पुरुष की चाही हुई वेश्या को तथा मुझे धिक्कार है और सबसे अधिक कामदेव को धिक्कार है जिसने यह सारा कुचक्र चलाया।

That woman is attracted by another man whom I supposed to be always devoted to me : to her another man is attached : while a certain other woman takes pleasure in my doings. Fie on her and on him, on the god of love, on that woman, and on myself.

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलवदुर्विदग्धं ब्रह्माऽपि तं नरं न रञ्जयति।।३।।

अनजान आदमी आसानी से मनाया जा सकता है। विशेषरूप से जानकार व्यक्ति तो उससे भी अधिक आसानी से मनाया जा सकता है। किन्तु थोड़ा ज्ञान पाकर निपुण बनने वाले मनुष्य को ब्रह्मा भी नहीं मना सकते।

The man who is entirely ignorant is easily guided : the wise man is still more easily led: but even the Supreme Being himself cannot influence the smatterer.

प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रान्तरात्
समुद्रमपि सन्तरेत्प्रचलदूर्मिमालाकुलम्।
भुजङ्गमपि कोपितं शिरसि पुष्पवद्धारयेत्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्।।४।।

मनुष्य घड़ियाल के मुख की डाढ़ों के बीच से मणि को बलपूर्वक निकाल सकता है, उठती हुई तरंगों से व्याप्त समुद्र को भी पार कर सकता है तथा क्रोधित किए हुए साँप को भी सिर पर फूल की भाँति धारण कर सकता है परन्तु हठी मूर्ख के चित्त को नहीं मना सकता।

A man may forcibly get back a jewel from the teeth of a crocodile : he may cross over the raging waves of the sea: he may wear an angry:

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

serpent^ on his head as if it were a garland of flowers: but he cannot win over the mind of one who is foolish and obstinate.

लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः।
कदाचिदपि पर्यटञ्छशविषाणमासादयेत्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्॥५॥

मनुष्य परिश्रम के साथ पेरने पर बालू में भी तेल पा सकता है, प्यास से व्याकुल होने पर मृगतृष्णा में भी, पानी पी सकता है और इधर-उधर घूमकर ढूँढ़ने पर खरगोश का सींघ भी पा सकता है परन्तु हठी मूर्खों के चित्त को नहीं मना सकता।

A man may get oil from sand by violent pressure : he may drink water from a mirage when oppressed by thirst : he may get possession of the horn of rabbit but he cannot win over the mind of one who is foolish and obstinate.

व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते
छेत्तुं वज्रमणिञ्छिरीषकुसुमप्रान्तेन सन्नह्यते।
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते
नेतुं वाञ्छति यः खलान्पथि सतां सूक्तैः सुधास्यन्दिभिः॥६॥

जो पुरुष अमृत टपकाने वाले मधुर वचनों से दुष्टों को सज्जन के मार्ग पर लाना चाहता है, वह कोमल कमलनाल के सूक्ष्म सूत्रों से दुष्ट हाथी को बाँधने की चेष्टा करता है, यह उसी प्रकार है जैसे शिरीषपुष्प के अग्रभाग से हीरे को काटना एवं एक बूँद शहद से खारे समुद्र में मिठास पैदा करना।

He who would lead evil men into the path of virtue by a few soft words, is as one who binds an elephant with a young lotus-fibre: as one

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

who tries to cut the diamond with a filament of irisha ; or as one who desires to make the salt sea sweet with a drop of honey.

स्वायत्तमेकान्तगुणं विधात्रा
विनिर्मितं छादनमज्ञतायाः।
विशेषतः सर्वविदां समाजे
विभूषणं मौनमपण्डितानाम्।।७।।

विधाता ने मूर्खों के लिए अपने हाथ में रहने वाले तथा नियम से सदा लाभ पहुँचाने वाले मौन को उनके अज्ञान का आवरण-स्वरूप बनाया है। यह मौन ज्ञानियों के समाज में मूर्खों के लिए विशेष-रूप से अलंकार-स्वरूप हो जाता है।

The Creator has given man, as it were, a cloak to conceal his ignorance : with that he can cover himself at all times, for it is always at hand. That gift is silence, the special ornament of the ignorant in the assembly of the wise.

यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवम्
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः।
यदा किञ्चित्किञ्चिद्बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः।।८।।

जब मैं अल्पज्ञ था और हाथी की भाँति मद से अन्धा हो गया था उस समय यह समझकर कि 'मैं सब जानता हूँ', मेरा मन गर्वयुक्त हो गया, परन्तु जब बुद्धिमानों के संसर्ग से कुछ थोड़ी सी जानकारी होने लगी तब यह समझकर 'मैं मूर्ख हूँ' मेरा वह मद ज्वर की भाँति उतर गया।

When I knew but a little, I was blinded by pride, as an elephant is blinded by passion : my mind was exalted, and in my arrogance I thought I knew all things. Then I came into the presence of the wise who know many kinds of wisdom, and my pride left me even like a fever.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कृमिकुलचितं लालाक्लिन्नं विगन्धिजुगुप्सितं
निरुपमरसं प्रीत्या खादन्नरास्थिनिरामिषम्।
सुरपतिमपि श्वा पार्श्वस्थं विलोक्य न शङ्कते
न हि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम्।।९।।

कीडों से भरी हुई, लार से भींगी हुई, दुर्गन्धयुक्त, घृणास्पद तथा मांसरहित मनुष्य की हड्डी को चाव से खाता हुआ कुत्ता इन्द्र को भी बगल में खड़ा देखकर कुछ शंका या लज्जा नहीं करता। ठीक है छुद्र प्राणी अपनाई वस्तु की निस्सारता को नहीं समझता।

A dog eats with delight putrid abominable bones, and though the king of the gods may stand before him, takes no heed: even so a mean man considers not the worthlessness of that which belongs to him.

शिरः शार्वं स्वर्गात्पशुपतिशिरस्तः क्षितिधरं
महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम्।
अधोऽधो गङ्गेयं पदमुपगता स्तोकमथवा
विवेकभ्रष्टानां भवति विनिपातः शतमुखः।।१०।।

स्वर्ग विष्णुपद से शंकर के सिर पर वहाँ से हिमालय पर्वत पर फिर बहुत ऊँचे हिमालय पर्वत से पृथ्वी पर और पृथ्वी से समुद्र में, इस प्रकार यह गंगा बराबर नीचे क्रमशः छोटे पद को प्राप्त होती गई। ठीक उसी प्रकार विवेक से गिरे हुए लोगों की अनेक प्रकार से अवनति होती है।

The Ganges falls from heaven upon the head of Siva; from the head of Siva on to the mountain; from the top of the mountain to the earth, always falling lower and lower: even in so many ways is the fall of one whose judgment has departed from him.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शक्यो वारयितुं जलेन हुतभुक्छत्रेण सूर्यातपो

नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ।

व्याधिर्भेषजसङ्ग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं

सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम्।।११।।

आग जल से शान्त की जा सकती है, सूर्य की धूप छाते से रोकी जा सकती है, मतवाला गज तीक्ष्ण अंकुश से वश में किया जा सकता है, बैल और गधे डण्डे से ठीक किए जा सकते हैं, रोग दवाओं के संग्रह से दूर किया जा सकता है और विष अनेक प्रकार के मन्त्रों के प्रयोग से उतारा जा सकता है। इस प्रकार सबकी दवा का विधान शास्त्र में हैं परन्तु मूर्ख के लिए कोई भी दवा नहीं है।

Fire can be quenched by water, the heat of the sun canr-be kept off by a parasol, a wild elephant can be guided by a sharp hook, an ox or an ass by a stick : sickness can be subdued by the help of physicians, poison by the assistance of various charms. A cure has been ordained by the Sastras for everything, but there is no medicine for the cure of a fool.

साहित्यसङ्गीतकलाविहीनः

साक्षात्पशुः पुच्छविषाणहीनः।

तृणं न खादन्नपि जीवमानः

तद्भागधेयं परमं पशूनाम्।।१२।।

साहित्य, संगीत एवं कला से अपरिचित मनुष्य बिना पूँछ और सींग का साक्षात् पशु है। वह तृण न खाकर भी जीवित रहता है, यह प्राकृत-रूप पशुओं के लिए बड़े सौभाग्य की बात है।

The man who has no sense of literature and music is like a beast, though he has not horns and a tail: he may not eat grass, but yet he lives a life exactly like that of the cattle.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

येषां न विद्या न तपो न दानं
ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भुवि भारभूता
मनुष्यरूपेण मृगाश्चरन्ति।।१३।।

जिन पुरुषों में विद्या, तप, दान, ज्ञान, शील, गुण तथा धर्म नहीं हैं वे पृथ्वी में भारस्वरूप पशु ही हैं जो मनुष्य के रूप में विचरण किया करते हैं।

Those in whom is neither wisdom, nor penance, nor liberality, nor knowledge, nor good disposition, nor virtue, nor righteousness, may live in the world of mortals in the form of men, but they pass through the world like beasts encumbering the earth.

वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह ।
न मूर्खजनसम्पर्कः सुरेन्द्रभवनेष्वपि ।।१४।।

पहाड़ों के दुर्गम स्थान में जंगली के साथ घूमना अच्छा है, परन्तु मूर्खों के साथ इन्द्र के महलों में भी रहना अच्छा नहीं है।

It is better to wander in a mountain-pass with the wild beasts than to live in the palace of the gods with a fool.

शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयागमा
विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः।
तज्जाड्यं वसुधाधिपस्य कवयोऽप्यर्थं विनापीश्वराः
कुत्स्याः स्युः कुपरीक्षका हि मणयो यैरर्घतः पातिताः।।१५।।

शास्त्रों के द्वारा अलंकृत किए हुए शब्दों से सुन्दर वाणी वाले तथा शिष्यों को शास्त्रों का उपदेश देने वाले प्रसिद्ध कवि लोग जिस राजा के देश में निर्धन होकर रहते हैं, उस राजा की ही जड़ता इससे सूचित होती है। विद्वान् लोग तो धन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

के बिना भी पूज्य हैं क्योंकि बुरे पारखी ही निन्दा के योग्य हैं जिन्होंने रत्नों को मूल्य से गिरा दिया अर्थात् उनका मूल्य घटा दिया।

When wise men dwell in poverty men whose words are adorned with polished sayings from the Sastras, and who impart sacred learning to their disciples then that prince in whose kingdom they dwell is chargeable with folly, and the wise men, though poor, are the rulers of the land. Should not those bad examiners be worthy of condemnation who (through) carelessness cause jewels to fall from their true value?

हर्त्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदा
ह्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम् ।
कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं
येषां तान्प्रति मानमुज्झत नृपाः कस्तैः सह स्पर्धते।।१६।।

जो चुराने वाले के हाथ नहीं लगता, जो अनिर्वचनीय कल्याण को सदा बढ़ाता रहता है, जो चाहने वालों को नित्य देने पर भी परम वृद्धि को प्राप्त होता है और जो प्रलयकाल में भी नष्ट नहीं होता है, वह विद्यारूपी गुप्त धन जिसके पास है, उनके प्रति - हे राजन् ! गर्व दिखाना छोड़ दो। उनकी स्पर्धा करने वाला कौन है ? अर्थात् कोई नहीं है।

Kings! Cast off your pride before those who have the inward treasure of wisdom: they are not despoiled by robbers, but their treasure, always increasing, grows greater when it is shared with the needy : not even at the end of the world does it perish. Who indeed may compare with them?

अधिगतपरमार्थान्पण्डितान्मावमंस्था-
स्तृणमिव लघु लक्ष्मीर्नैव तान्संरुणद्धि।
अभिनवमदलेखाश्यामगण्डस्थलानां
भवति न बिसतन्तुर्वारणं वारणानाम्।।१७।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हे राजन् ! तत्त्व को जानने वाले पण्डितों का अपमान मत करो। तुच्छ तृण की भाँति लक्ष्मी उन्हें बाँध नहीं सकती अर्थात् वश में नहीं कर सकती। कमलनाल के सूत्र से, ताजे मद की लकीर से, काले गण्डस्थल वाले हाथियों का वारण नहीं हो सकता।

Despise not wise men who have attained to knowledge of the truth. They are not held bound by riches, for they count wealth even as grass. The stalk of a waterlily will not bind an elephant who is infuriated by passion.

अम्भोजिनीवननिवासविलासमेव
हंसस्य हन्ति नितरां कुपितो विधाता ।
न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां
वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः ।।१८।।

क्रुद्ध ब्रह्मा हंस का कमलिनी के वन में विहार करना ही एकदम रोक सकता है न कि इसके दूध और जल को दूर करने के लिए विख्यात चातुर्य को नष्ट करने में समर्थ हो सकता है।

The Creator in his anger may hinder the swan from sporting in the lotus-bed, his dwelling; but he cannot take away his faculty of separating milk from water.

केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ।।१९।।

पुरुष को न बाजूबन्द ही सुशोभित करते हैं, न चन्द्रमा के समान उज्ज्वल हार, न स्नान, न ही चन्दन आदि का लेपन, न फूल एवं न सँवारे हुए बाल ही सुशोभित करते हैं। केवल वाणी ही पुरुष को भली-भाँति सुशोभित करती है, जो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्याकरण आदि से शुद्ध करके धारण की जाती है, आभूषण तो कालक्रम से नष्ट हो जाते हैं परन्तु वाणीरूपी आभूषण सदा नित्य रहने वाला है।

Bracelets are no ornament to a man, nor strings of pearls clear as the moon ; nor yet bathing, nor perfumes, nor flowers, nor decorated hair. Perfect eloquence alone adorns a man. Adornments may perish, but the ornament of eloquence abides for ever.

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं
विद्या राजसु पूजिता न तु धनं विद्याविहीनः पशुः॥२०॥

विद्या ही मनुष्य का श्रेष्ठ स्वरूप तथा अत्यन्त गुप्त धन है। विद्या वस्त्रादि भोग को उत्पन्न करने वाली और यश तथा सुख को देने वाली है। विद्या गुरुओं की भी गुरु अर्थात् उनसे भी अधिक पूज्य है। विद्या विदेश यात्रा में कुटुम्ब का कार्य करती है। विद्या ही सबसे बडी देवी है। राजाओं के यहाँ विद्या की ही पूजा होती है न कि धन की। अतः विद्या से रहित पुरुष पशु है।

Wisdom, indeed, is the highest ornament that a man possesses. It is a valuable to be carefully guarded, for wisdom gains food, glory, and blessing. It is the lord of lords. Wisdom is as a friend to a man travelling in a distant land. Wisdom is honoured among kings even more than wealth. The man devoid of wisdom is but an animal.

क्षान्तिश्चेत्कवचेन किं किमरिभिः क्रोधोऽस्ति चेद्देहिनां
ज्ञातिश्चेदनलेन किं यदि सुहृद्दिव्यौषधैः किं फलम् ?
किं सर्पैर्यदि दुर्जनाः किमु धनैर्विद्याऽनवद्या यदि
व्रीडा चेत्किमु भूषणैः सुकविता यद्यस्ति राज्येन किम् ? ॥२१॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मनुष्यों में यदि क्षमा हो तो कवच की क्या आवश्यकता ? क्रोध हो तो शत्रुओं का क्या प्रयोजन ? जाति के लोग हों तो आग का क्या काम ? मित्र हों तो उत्तम औषधियों से क्या लाभ ? दुर्जन हों तो सर्पों का क्या काम ? दोष-रहित विद्या हो तो धन की क्या आवश्यकता ? लज्जा हो तो आभूषणों की क्या आवश्यकता ? सुन्दर कविता हो तो राज्य से क्या प्रयोजन हो सकता है ?

If a man has patience, what need has he of armour? If he has anger in his heart, what further enemy need he fear? If he has knowledge, what need of fire to consume evil? If a friend, what need has he of divine medicines? If there are malicious people about him, why should he be afraid of serpents? If he has perfect wisdom, what need of riches? If he is modest, what need has he of ornament? If he gives his mind to poetry, what need has he of power?

दाक्षिण्यं स्वजने दया परजने शाठ्यं सदा दुर्जने
प्रीतिः साधुजने नयो नृपजने विद्वज्जनेष्वार्जवम्
शौर्यं शत्रुजने क्षमा गुरुजने नारीजने धूर्तता
ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः।।२२।।

अपने लोगों, पुत्र-कलत्र आदि के साथ उदारता, सेवक लोगों के साथ दया, दुष्टों के साथ दुष्टता, सज्जनों के साथ प्रीति, राजा के साथ नीति, विद्वानों के साथ विनम्रता, शत्रुओं के साथ शूरता, गुरुजनों के साथ सहनशीलता तथा स्त्रियों के साथ धृष्टता, जो लोग इस प्रकार की कलाओं में निपुण हैं उन्ही पर संसार टिका हुआ है।

Be well disposed towards relatives; liberal to inferiors: always hate the evil; love the good; be obedient to princes; honour the wise. Be firm towards enemies; be respectful to venerable men; deal shrewdly with women. The man who frames his life after these precepts prospers in the world.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम् ?।।२३।।

बुद्धि की मन्दता को दूर करता है, वाणी में सत्यता को पल्लवित करता है, ऊँचा सम्मान प्रदान करता है, पाप को दूर करता है, चित्त को प्रसन्न करता है तथा दिशाओं में यश फैलाता है। बताओ, सज्जनों का साथ पुरुष के लिये क्या नहीं करता है ?

Intercourse with wise men takes away dullness of mind, elevates the intellect, and inspires the speech with truthfulness. What will it not do for men?

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः।
नास्ति येषां यशःकाये जरामरणजं भयम् ।।२४।।

सब रसों में सिद्ध तथा पुण्यवान् वे महाकवि लोग सबसे बढ़कर हैं, जिनके यशरूपी शरीर को बुढ़ापे और मृत्यु का भय नहीं है।

May there be glory to wise men who are learned and accomplished poets! There is no fear that their renown shall wither or perish.

सूनुः सच्चरितः सती प्रियतमा स्वामी प्रसादोन्मुखः
स्निग्धं मित्रमवञ्चकः परिजनो निःक्लेशलेशं मनः ।
आकारो रुचिरः स्थिरश्च विभवो विद्यावदातं मुखं
तुष्टे विष्टपहारिणीष्टदहरौ सम्प्राप्यते देहिना ।।२५।।

संसार के कष्ट को हरने वाले भगवान् के प्रसन्न होने पर मनुष्य को, सदाचारी पुत्र, पतिव्रता भार्या, प्रसन्न होने वाला स्वामी, स्नेहयुक्त मित्र, विश्वासपात्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सेवक, सर्वथा क्लेशों से रहित (शान्त) चित्त, सुन्दर स्वरूप, स्थायी सम्पत्ति, विद्या से निर्मल मुख, ये सब मिलते हैं।

A virtuous son, an affectionate wife, a liberal master, a loving friend, a guileless kinsman, a mind not harassed by care, a handsome form, abiding riches, a mouth abounding in wisdom these are the gifts which Hari, the giver of desires, the delight of the earth, bestows upon the man with whom he is pleased.

प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं
काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम् ।
तृष्णास्त्रोतोविभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा
सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः।।२६।।

जीवहिंसा से दूर रहना, दूसरे के धन के हरण से चित्त को रोकना, सच बोलना, उचित समय पर सामर्थ्य के अनुसार दान देना, पराई स्त्रियों की चर्चा के समय मौन धारण करना, तृष्णा के प्रवाह को रोकना, गुरुजनों के प्रति नम्रता रखना तथा सब जीवों पर दया दिखलाना, यही सब शास्त्रों में अप्रतिषिद्ध (उचित) विधि वाला सर्वजनसाधारण कल्याण का मार्ग है ।

Abstinence from destroying life, keeping one's hands off another's wealth, speaking the truth, reasonable liberality according to one's power, not conversing with the wives of other men, checking the stream of covetousness, reverence towards spiritual fathers, compassion towards all creatures this is the path of happiness, violating no ordinances, taught in all the Sastras.

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारभ्य तूत्तमजना न परित्यजन्ति।।२७।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नीच (हीन) पुरुष विघ्न के डर से किसी काम को शुरू ही नहीं करते, और मध्यम श्रेणी के लोग शुरू करके भी विघ्नों से विचलित होकर रुक जाते हैं। (परन्तु) विघ्नों द्वारा बार-बार विचलित किये जाने पर भी उत्तम पुरुष (किसी काम को) शुरू करके (उसे) नहीं छोड़ते ।

The low-minded man does not make even the least effort in the pursuit of wisdom through fear of difficulties: if he has made any attempt, he stops when obstacles meet him. The noble-minded man may meet with repeated hindrances, but when he has once begun the pursuit of wisdom he does not give it up.

असन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः
प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम् ।
विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम्।।२८।।

सज्जनों को इस कठोर असिधाराव्रत का किसने उपदेश दिया ? जिसमें असज्जनों तथा थोड़े धनवाले मित्र से (धन आदि) नहीं माँगा जाता, प्रिय और न्याययुक्त जीविका का आश्रय लेना पड़ता है, निन्द्य कर्म करना प्राणनाश (की सम्भावना) होने पर भी दुष्कर होता है, विपत्ति में ऊँचे रहना होता है तथा बड़े लोगों के मार्ग का अनुसरण करना होता है ।

Righteousness must be loved; evil must be avoided, even at the risk of death; wicked men must not be spoken to ; a poor man, even though he be a friend, must not be asked for alms : even in adversity the foot must be constant, and the vow taught by good and great men must be conformed to, even if it be as difficult as to stand on the edge of a sword !

क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्राणोऽपि कष्टां दशा-
मापन्नोऽपि विपन्नदीधितिरपि प्राणेषु नश्यत्स्वपि ।
मत्तेभेन्द्रविभिन्नकुम्भकवलग्रासैकबद्धस्पृहः
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ।।२९।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मस्त गजराज के फाड़े हुए मस्तक के मांस को ही खाने की इच्छा करने वाले बड़े-बड़े मानियों में अग्रगण्य, भूख के कारण क्षीण, बुढ़ापे के कारण दुर्बल, बलहीन, कष्ट देनेवाली दशा को प्राप्त तथा तेजहीन सिंह प्राण के विनाशोन्मुख होने पर भी क्या सूखा तृण खाता है ? अर्थात् कभी नहीं खाता ।

The lion, though overwhelmed by hunger and weakened by old age, though at the point of death and in a state of misery, and though his majesty may have left him and his life be vanishing away, yet his whole desire is to swallow at one mouthful the forehead of the kingly elephant which he has crushed in pieces. How should he, the mightiest of living things, feed upon withered grass!

स्वल्पं स्नायुवसावशेषमलिनं निर्मांसमप्यस्थिगोः
श्वा लब्ध्वा परितोषमेति न तु तत्तस्य क्षुधाशान्तये।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलम्।।३०।।

कुत्ता नस और चरबी के अवशिष्ट (बचे हुए) थोड़े से भाग (के लगे रहने) से गन्दी तथा मांसरहित भी छोटी सी हड्डी को पाकर सन्तुष्ट हो जाता है, यद्यपि वह उसकी भूख मिटाने भर के लिये नहीं होती। सिंह गोद में आये हुए गीदड़ को छोड़कर हाथी का वध करता है। कष्ट में रहने पर भी सब प्राणी अपनी शक्ति के अनुसार ही फल चाहते हैं ।

A dog rejoices over a small filthy bone of an ox which he has found stripped of flesh, though it satisfies not his hunger ; but the lion passes by the jackal standing near him and attacks the elephant. So the man of firm mind, even though he may be in distress, desires that which is in accordance with his natural disposition.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वेद पाठशालाएँ तथा गुरु-शिष्य परम्परा इकाइयाँ



ISBN 978-93-83597-09-3

MAHARSHI SANDIPANI RASHTRIYA VEDAVIDYA PRATISHTHAN

(Under the Ministry of Human Resource Development, Govt. of India)

Vadvidya Marg, Chintaman Ganesh, Post. Jawasia, Ujjain 456006 (M.P.)

Phone : (0734) 2502266,2502254, Fax : (0734) 2502253

E-mail : msrvvpujn@gmail.com web - www.msrvvp.nic.in

Kirtikant Sharma Collection, Najafgarh